
This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google™ books

https://books.google.com



COLUMBIA LIBRARIES OFFSITE
CU58985492
892.1N59 U5 Paribhasavrttih



892.1N59 U5

Digitized by Google

892.1N59 U5

Columbia University
in the City of New York

LIBRARY



Digitized by Google

Digitized by Google

Digitized by Google

TRIVANDRUM SANSKRIT SERIES.
NO. XLVI.

THE

PARIBHÂSHÂVṚITTI

OF

NÎLAKAṆṬHA DÎKSHITA

EDITED BY

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.
1915.

All Rights Reserved.)

Digitized by Google

892.1N59
U5

Digitized by Google

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४६.

परिभाषावृत्तिः

नीलकण्ठदीक्षितविरचिता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधिता ।

सा च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशिता ।

कोल्लम्वाब्दाः १०९१, क्रैस्ताब्दाः १९१५.

Digitized by Google

Digitized by Google

PREFACE.

The present work is a short Vritti on the Paribhâshas, and follows mostly the large and copious Paribhâshâvritti of Sîradeva. This work will prove useful to the students of Vyâkaraṇa who like brief treatises.

The author of this Vritti is one Nîlakantha Yajvan, and very little is known about his date and birth-place. It is probable that he is earlier than the wellknown Nâgesa Bhaṭṭa, as he makes no mention of the latter in his Vritti. The author refers to a work called Gûḍhârthadîpikâ (a commentary on the Tattvabodhinî) as written by his preceptor. Some other Vyâkaraṇa works are also known as having been written by the author, viz., Bhâshyatattvaviveka, Vaiyâkaraṇasiddhântarahasya (a commentary on the Siddhântakaumudî) and Pâninîyadîpikâ.

The edition of this work is based on two palm-leaf manuscripts in Malayalam character. One of them named क was kindly lent to me by the Râja of Panthalam. The other manuscript named ख is incomplete and belongs to Chunakkara Mr. Krishna Varyar.

Trivandrum,
14-8-1915.

T. GANAPATI SÂSTRI.

Digitized by Google

Digitized by Google

निवेदना।

एषा परिभाषावृत्तिः सीरदेवीयपरिभाषावृत्तिं प्रायोऽनुसरति। सा तु विस्तृता, इयं संक्षिप्तरूपा। व्याकरणाध्यायिनो ये संक्षेपरुचयश्छात्राः, तेषामियमुपकाराय प्रभवति।

अस्याः प्रणेता नीलकण्ठयज्वा कदा कस्मिन् देशे स्थित इति न विज्ञायते। किन्तु सुप्रसिद्धं नागेशभट्टमस्मरन्नयं ततः प्राचीनः कामं स्यात्। एष स्वगुरुचरणकृतं गूढार्थदीपिकाख्यानं किमपि तत्त्वबोधिनीव्याख्यानं स्मरति। भाष्यतत्त्वविवेकः, वैयाकरणसिद्धान्तरहस्यं (सिद्धान्तकौमुदीव्याख्यानम्), पाणिनीयदीपिका इति केचिद् व्याकरणग्रन्था एतेन निर्मिता इत्यवगम्यते।

एतद्ग्रन्थसंशोधनाधारभूतौ द्वावादर्शौ केरलीयलिपी-तालपत्रात्मकौ। तत्रैकः पन्तलराजीयः क. संज्ञः, अपरोऽसमग्रः (चुनक्कर)-कृष्णवार्यसंबन्धी ख. संज्ञः।

अनन्तशयनम्
१४-८-१९१५

त. गणपतिशास्त्री.

Digitized by Google

Digitized by Google

॥ श्रीः ॥

नीलकण्ठदीक्षितविरचिता

परिभाषावृत्तिः ।

वरदेश्वरयज्वानं नीलकण्ठेन[1] यज्वना ।
नमस्कृत्य सतां प्रीत्यै शब्दन्यायो विविच्यते ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ॥ १ ॥

अण्ग्रहणेषु पूर्वणकारेण परणकारेण वेति सन्देहवारणाय 'लण्' इति सूत्रेऽन्यानुबन्धे कर्तव्ये पुनर्णकारानुबन्धादियं परिभाषा ज्ञाप्यते । अस्यार्थः—व्याख्यानतो व्याख्यानाद् विशेषप्रतिपत्तिरर्थविशेषज्ञानं, न तु सन्देहमात्रेण [$]अलक्षणम्, अबाधः । लक्ष्यतेऽनेनेति लक्षणं ज्ञानसाधनम् । अबोधकत्वं[2] नास्तीत्यर्थः ॥ १ ॥

न हि कार्यी निमित्तत्वेनाश्रीयते ॥ २ ॥

कार्यमनुभवन् कार्यी स्थानी निमित्तत्वेन ना-

---

१. 'ण्ठीयय', २. 'त्वान्नास्ती' ख. पाठः.

$ इह शास्त्रमिति शेषः । शास्त्रस्यालक्षणत्वाभावश्च अबाधरूपः । तदाह—अबाध इति ।

Digitized by Google

श्रीयते, नोपादीयत इत्यर्थः । इयं च 'दीधीवेवीटाम्' (१. १. ६) इति सूत्रेण गुणप्रतिषेधाज्ज्ञाप्यते । अन्यथा 'दीधीङ् दीप्तिदेवनयोः', 'वेवीङ् वेतिना तुल्ये' एतयोर्ङित्त्वादेव गुणनिषेधे सिद्धे किं गुणनिषेधेन । प्रयोजनम् 'इङ् अध्ययने' अध्येता 'शीङ् स्वप्ने' शयितेत्यादौ तृचि 'सार्वधातुकार्धधातुकयोः' (७. ३. ८४) इति गुणः ॥ २ ॥

इतरेतराश्रयाण्यपि[1] कार्याणि[2] प्रकल्पन्ते ॥ ३ ॥

'इग्यणः सम्प्रसारणम्' (१. १. ४५) इत्यत्र भाष्ये भाविसंज्ञाविज्ञानादियं न्यायमूलिकेत्युक्ता। तद्यथा—अस्य सूत्रस्य शाटकं वयेत्युक्ते यदि शाटकः, न वातव्यः, अथ वातव्यः, न शाटकः । शाटको वातव्य इति विप्रतिषिद्धम् । एवं तर्हि भाविनी संज्ञाभिप्रेता, यस्मिन्नुते शाटक इति संज्ञा भवति, तथा वय इति। तेन 'इग्यणः सम्प्रसारणमि'त्यादौ सम्प्रसारणसंज्ञासिद्धिः ॥ ३ ॥

यैदागमास्तद्गुणीभूतास्तद्ग्रहणेन[3] गृह्यन्ते ॥ ४ ॥

प्रधानस्यावयवभूता आगमा अवयविग्रहणेन गृह्यन्त इत्यर्थः । इयं च लोकन्यायसिद्धेति 'आद्यन्तौ

---

१. 'णि च' ख. पाठः. २. 'णि क' क. पाठः. ३. 'त' ख. पाठः,

Digitized by Google

टकितौ' (१. १. ४६) इति सूत्रे भाष्यम् । 'नेटि' (७. २. ४) इति निषेधोऽपि ज्ञापकः । अन्यथेड्वति सिचि 'सिचि वृद्धिः परस्मैपदेषु' (७. २. १) इत्यस्य प्राप्तेरेवाभावात् किं तन्निषेधार्थेन 'नेटी'ति सूत्रेणेति स्पष्टमाकरे । इयं च वर्णग्रहणे न प्रवर्तते, आने मुको विधानादिति 'उरण् रपरः' (१. १. ५१) इति सूत्रे भाष्ये स्पष्टम् ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥

निर्दिश्यमानस्य स्थानित्वेनोपात्तस्यादेशा विधीयमाना भवन्तीत्यर्थः । इयं च 'षष्ठी स्थानेयोगा' (१. १. ४९) इत्यस्यार्थस्यान्वाख्यायिका । अन्यथा 'अस्तेर्भूः' (२. ४. ५२) इत्यादावस्तेः स्थानेऽनन्तरे समीपे वेति सन्देहे 'व्याख्यानतो विशेषप्रतिपत्तिरि'ति सन्देहनिवृत्तिसिद्धौ किं सूत्रेणेत्याक्षिप्य 'षष्ठ्यन्तं स्थानेन (यथा) युज्येत, यतः षष्ठ्युच्चारि(तं ? ता) । किं कृतं भवति 'षष्ठी स्थानेयोगे'ति । एषा *परिभाषा न कर्तव्या भवती'ति 'षष्ठी स्थानेयोगे'ति सूत्रे भाष्ये प्रतिपादितम् । तेन 'षष्ठी स्थानेयोगे'ति सूत्रार्थभूतेति फलितम् । 'पादः पत्' (६. ४.

---

१. 'चि वृ', २. 'मेवाक', ३. 'तं कृ' ख. पाठः.

---

* 'निर्दिश्यमानस्यादेशा भवन्तीत्येषा' इति मुद्रितमहाभाष्यपाठः ।

Digitized by Google

१३०) इति सूत्रे भाष्येऽपि 'निर्दिश्यमानस्यादेशा भवन्ती'त्येषा न कर्त्तव्या 'षष्ठी स्थानेयोगे'त्यनेन सिद्धेरित्युक्तम् । इयं चावयवषष्ठीविषयेऽपि । तेन तदोः सत्वम् अतिस्य इत्यत्र नेति 'पादः पत्' (६. ४. १३०) इति सूत्रे भाष्ये स्पष्टम् । रिङादीनां ङित्करणाद् वर्णग्रहणे नैषा प्रवर्तते । अनया च 'अलोऽन्त्यस्य' (१. १. ५२) इत्यादीनां स्वस्वनिमित्तसान्निधापितानां समावेश एव न तु बाध्यबाधकभावः, विरोधाभावात् । उभयोरपि तुल्यबलत्वात् परार्थत्वाच्चाङ्गाङ्गिभावोऽपि नेति ध्येयम् ॥ ५ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

इत्संज्ञकवर्णकृतं सर्वादेशप्रयोजकीभूतमनेकाल्त्वं नाश्रीयत इत्यर्थः । एतच्च 'अनेकाल्शित् सर्वस्य' (१. १. ५५) इति शित्करणेन ज्ञाप्यते । अन्यथा 'इदम इश्' (५. ३. ३) इत्यादेरनेकाल्त्वेन सर्वादेशत्वे सिद्धे किं तदर्थेन शित्करणेन इति 'अनेकाल्शित् सर्वस्ये'ति सूत्रे भाष्ये स्पष्टम् ॥ ६ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ७ ॥

अनुबन्धकृतमित्संज्ञकवर्णकृतमनेजन्तत्वमेजन्तत्वप्रतिबन्धकं नेत्यर्थः । तेन 'धेट् पाने' इत्यस्यैजन्तत्वाद् 'आदेच उपदेशेऽशिति' (६. १. ४५) इत्या-

---

१. 'द्धेत्यु' ख. पाठः.

Digitized by Google

त्वप्रवृत्तिरप्रतिहता । अत्र च ज्ञापकम् 'उदीचां माङो व्यतीहारे' (३. ४. १९) इति सूत्रे कृतात्वस्य मेङः सानुबन्धकनिर्देश इति 'दाधा घ्वदाप्' (१. १. २०) इति सूत्रे (भाष्ये) स्पष्टम् ॥ ७ ॥

नानुबन्धकृतमसारूप्यम् ॥ ८ ॥

इत्संज्ञकवर्णकृतं वैजात्यं नाश्रीयत इत्यर्थः । तेन शप्यं लभ्यमित्यादौ 'पोरदुपधात्' (३. १. ९८) इति यत्प्रत्यये वासरूपपरिभाषया 'ऋहलोर्ण्यत्' (३. १. १२४) इति ण्यत्प्रत्ययो न भवति अत्र च ज्ञापकं 'ददातिदधात्योर्विभाषा' (३. १. १३९) इति सूत्रे विभाषाग्रहणम् । अन्यथा वासरूपन्यायेन णप्रत्ययप्रवृत्त्या[1] दायो धाय इति रूपसिद्धौ शप्रत्यये ददो दध इति च रूपसिद्धौ किं विभाषाग्रहणेनेति वासरूपसूत्रे भाष्ये स्पष्टम् ॥ ८ ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ ९ ॥

प्राधान्येन वर्णमाश्रित्य यत्र कार्यं विधीयते, तत्राल्विधित्वादप्राप्तप्रत्ययलक्षणविध्यर्थं 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१. १. ६२) इति सूत्रेण विधीयमानं न प्रवर्तत इत्यर्थः । तेन गवे हितं गोहितमित्यत्र प्रत्ययलोपपरिभाषयावादेशो न । इयं च परिभाषा 'प्रत्ययलोपे प्रत्ययलक्षणमि'ति सूत्रे प्रत्यय-

---

१. 'सकृत्या दा' क. पाठः.

Digitized by Google

पदस्यानुवर्तनाल्लोपे प्रत्ययलक्षणमित्येव सिद्धे पुनः प्रत्ययग्रहणेन ज्ञाप्यते । तेन प्रत्ययस्यैवासाधारणं रूपं यत्राश्रीयते तत्रैव प्रत्ययलक्षणं, नान्यत्रेति प्रत्ययलक्षणसूत्रे भाष्ये स्पष्टम् ॥ ९ ॥

क्वचिदेकदेशोऽप्यनुवर्तते ॥ १० ॥

स्पष्टम् । यदंशे स्वरितत्वप्रतिज्ञानमस्ति, तावदेवानुवर्तत इत्यर्थः । तेन 'समर्थानां प्रथमाद्वा' (४. १. ८२) इति पदत्रयस्याधिकृतत्वेऽपि 'प्राग् दिशः—' (५. ३. १) इत्यस्यानन्तरं समर्थानां प्रथमादित्येतयोर्निवृत्तावपि वेत्यस्यानुवृत्तिरस्ति । एतच्च 'संख्याव्ययादेर्ङीप्' (४. १. २६), 'दामहायनान्ताच्च' (४. १. २७) इति सूत्रयोर्भाष्ये स्पष्टम् ॥ १० ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ ११ ॥

स्पष्टम् । तेन 'प्रादूहोढ—' (वा० ६. १. ८९) इत्यत्रोढग्रहणेन ऊढवच्छब्दग्रहणाभावः । अत्र ज्ञापकं 'व्रश्च—'(८. २. ३६) इति सूत्रे राजेः पृथग् भ्राजिग्रहणमिति कौस्तुभकाराः । भाष्ये तु 'स्वं रूपं—' (१. १. ६८) इति सूत्रे रूपग्रहणं विहाय स्वं शब्दस्येति सूत्रिते सत्यर्थवद्ग्रहणे नानर्थकस्य ग्रहणाभाव इति 'स्वं रूपं—' इति सूत्रे स्थितम् । ननु 'स्वं रूपमि'ति

---

१. 'त्यनु' क. पाठः. २. 'ते अर्थ' ख. पाठः.

Digitized by Google

सूत्रस्य भाष्ये प्रत्याख्यानात् कथमियं रूपग्रहणेन ज्ञाप्यत इति चेत् । सत्यम् । उपस्थितस्यार्थस्य शब्दाविनाभूतस्य शब्दं प्रति विशेषणत्वेनान्वयसम्भवे सर्वथा त्यागे मानाभाव इति न्यायमूलैषा परिभाषेति तत्रैव सूत्रे भाष्ये स्पष्टमिति ध्येयम् । इयं च विशिष्टरूपोपादान एव प्रवर्तत इति 'ओतुं' (१. १. १५) इति सूत्रे कौस्तुभादिषु स्पष्टम् ॥ ११ ॥

न वर्णग्रहणेषु ॥ १२ ॥

इयमर्थवत्परिभाषा वर्णग्रहणे न प्रवर्तत इत्यर्थः । तेन 'यस्य हलः' (६. ४. ४९) इत्यत्र यस्येति सङ्घातग्रहणात् पुत्रकाम्येत्यादौ न यलोप इत्याकरे स्पष्टम् ॥ १२ ॥

एतन्मूलकमेव 'येन विधिः —' (१. १. ७२) इत्यत्र भाष्ये स्पष्टं पठ्यते —

अलैवानर्थकेन तदन्तविधिः ॥ १३ ॥

इति । स्पष्टम् । तेन हन्ग्रहणे ह्लीहन्ग्रहणं न ॥ १३ ॥

गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ॥ १४ ॥

गौणत्वमप्रसिद्धत्वं लाक्षणिकत्वं च । तत्रोपात्तविशिष्टरूपपदान्तरसम्बन्धनिमित्तकेकार्यस्याप्रवृत्तिरिति भावः । एतच्च 'निपात एकाजनाङ्' (१. १. १४)

---

१. 'तसूत्रे' ख. पाठः. २. 'के' क. पाठः.

Digitized by Google

इति सूत्रे भाष्ये स्पष्टम् । इयं चानित्या, 'इणः षीध्वं-लुङ्लिटां धोऽङ्गात्' (८. ३. ७८) इत्यत्राङ्ग्रहणात् । तद्धि परिवेविषीध्वमित्यत्र मूर्धन्यादेशनिवृत्तये क्रियते । यदि चेयं परिभाषा (नित्या) स्यात्, तदा गौणत्वादेव[1] तत्रादेशस्याप्रवृत्तिसिद्धौ किं तद्व्यावृत्त्यर्थकाङ्ग्रहणेन । तत् क्रियमाणं परिभाषाया अनित्यतां ज्ञापयतीति दिक् ॥ १४ ॥

एतन्मूलकमेव 'येन विधिः—' (१. १. ७२) इत्यत्र भाष्ये स्पष्टं पठ्यते—

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १५ ॥

इति । अनिन्नादयो गृह्यन्ते येषु तान्यनिनस्मन्ग्रहणानि, अर्थवदनर्थकसाधारण्येन तदन्तविधिं भावयन्तीत्यर्थः । राज्ञेत्यर्थवता साम्नेत्यनर्थकेन, दण्डीत्यर्थवता वाग्मीत्यनर्थकेन, सवया इत्यर्थवता सुस्रोता इत्यनर्थकेन, सुशर्मेत्यर्थवता सुप्र(ति ? थि)मेत्यनर्थकेन ॥ १५ ॥

भाव्यमानोऽण् सवर्णान् न गृह्णाति ॥ १६ ॥

विधीयमानोऽण् स्वग्राह्यदीर्घादीन् न गृह्णातीत्यर्थः । तेन इदम इश् विधीयमानो ह्रस्व[2] एव न तु दीर्घः । ननु 'अणुदित् सवर्णस्य चाप्रत्ययः' (१. १. ६९) इति सूत्रेऽप्रत्यय इति निषिद्धत्वादेव विधीयमा-

---

१. 'वादे', २. 'स्वो न' ख. पाठः,

Digitized by Google

नस्येशादेशस्य सवर्णग्राहकत्वाभावसिद्धेरियं परिभाषा किमर्थेति चेत् । सत्यम् । असत्यामस्यामप्रत्यय इत्यस्योदिदंशेऽपि सम्बन्धः स्यात्, परिभाषारम्भे तु अणंश एव सम्बन्ध इति निर्णीयते । तेनास्यार्थस्येयमन्वाख्यायिकेति फलितम् । यदि तु 'चोः कुः' (८. २. ३०) इत्यादिविधिप्रदेशेषूदित्करणादप्रत्यय इत्यस्योदिदंशे सम्बन्धाभावसिद्धिः, तदा परिभाषा मन्दैवेत्यणुदित्सूत्रे भाष्ये स्पष्टम् । इयं चानित्या, 'उरत्' (७. ४. ७) इत्यादौ तपरकरणाल्लिङ्गात् । अन्यथा विधीयमानत्वादकारस्य सवर्णग्राहकत्वाप्राप्तेः किं तन्निवृत्त्यर्थकेन तपरकरणेनेति स्पष्टमाकरे ॥ १६ ॥

यस्मिन् विधिस्तदादावल्ग्रहणे ॥ १७ ॥

सप्तम्यन्तेन विधौ विशेषणं तदादेः संज्ञा स्यात् । तदन्तविध्यपवादः । इयं च वाचनिकी । एतच्च 'येन विधिः—' (१. १. ७२) इति सूत्रे वार्त्तिकत्वेन भाष्ये पठितम् । तेन 'वान्तो यि प्रत्यये' (६. १. ७९) इत्यत्र यादौ प्रत्यय, इत्यर्थलाभाद् गव्यमित्यादिसिद्धिः ॥ १७ ॥

विधिविधानविधिभाजां त्रयाणां सन्निधाने तदन्तविधिर्भवति ॥ १८ ॥

स्पष्टम् । इयं च निर्मूलेति केचित् । 'येन वि-

Digitized by Google

धिः—' (१. १. ७२) इत्यस्य फलितार्थकथनमित्यन्ये ॥ १८ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १९ ॥

सूत्रस्थपरस्परान्वितपदार्थकपदानां सहैवानुवृत्तिनिवृत्ती इत्यर्थः । वाशब्दोऽवधारणार्थः । अत्र च ज्ञापकं 'नेड्वशि कृति' (७. २. ८) इत्यत्रेडित्यनुवर्तमानेनापि सिद्धौ 'आर्धधातुकस्येड् वलादेः' (७. २. ३५) इत्यत्र पुनरिड्ग्रहणम् । तद्धि निषेधसम्बन्धनिवृत्त्यर्थम् । यदि चान्वितपदार्थकपदैकदेशानुवृत्तिरिष्येत, ततो व्यर्थमेवेड्ग्रहणं स्यात् । नच 'दीधीवेवीटाम्' (१. १. ६) इति सूत्रे इडिति वर्तमाने पुनरिड्ग्रहणमिटो गुणनिवृत्त्यर्थमित्युक्तार्थज्ञापकं कथमिति वाच्यम् । 'दीधीवेवीटामि'ति सूत्रकारेणेटो गुणनिषेधारम्भेण तन्मते गुणनिवृत्त्यर्थकोपायान्तरस्यानावश्यकतया पुनरिड्ग्रहणस्य प्रयोजनान्तरालाभेनोक्तपरिभाषाज्ञापकत्वसिद्धेः । भाष्यमते तु वाचनिकीयम् । इयं चानित्या । 'झोऽन्तः' (७. १. ३), 'समर्थानां प्रथमाद्वा' (४. १. ८२) इत्यादावेकदेशस्यानुवृत्तिदर्शनादित्यस्मद्गुरुचरणकृततत्त्वबोधिनीव्याख्याने गूढार्थदीपिकाख्याने प्रपञ्चितम् ॥ १९ ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २० ॥

व्युत्पत्तिकार्याभाववन्तीत्यर्थः । अत्र च ज्ञापकम्

Digitized by Google

'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (८. ३. ४६) इति सूत्रे कमिग्रहणात् पृथक् कंसग्रहणम् । अन्यथा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादेव कमिग्रहणे कंसग्रहणस्यापि सिद्धत्वात् किं तद्ग्रहणेनेति भाष्ये स्थितम् ॥ २० ॥

उणादयो व्युत्पन्नान्यपि ॥ २१ ॥

एतच्च 'ण्वल्तृचौ' (३. १. १३३) इति सूत्र-(भाष्य)पर्यालोचनया लभ्यत इत्याहुः ॥ २१ ॥

सर्वो द्वन्द्वो विभाषयैकवद् भवति ॥ २२ ॥

इयं च न्यायसिद्धा । 'चार्थे द्वन्द्वः' (२. २. २९) इति सूत्रेणेतरेतरसमाहारयोरविशेषेण द्वन्द्वविधानात् । 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' (१. २.६३) इति सूत्रे बहुवचनग्रहणं ज्ञापकं च । यदि च नित्यमेकवत् , तदा बहुवचनायोगात् तस्य द्विवचनविधानमनुपपन्नं स्यादिति 'तिष्यपुनर्वस्वोरि'ति सूत्रे भाष्ये स्थितम् ॥ २२ ॥

प्रकृतिवदनुकरणं भवति ॥ २३ ॥

स्पष्टम् । अत्र च ज्ञापकं 'भू सत्ताया'मित्यत्र विभक्त्यदर्शनमेव । 'यत्तदेतेभ्यः —' (५. २. ३९) इति

---

१. 'कंसग्र', २. 'त्यादिसू' क. पाठः,

Digitized by Google

ज्ञापकमप्यस्याः । अत्र चैकशेषाकरणादनित्या चेयम् । 'क्षियो दीर्घात्' (८. २. ४६) इति सूत्रे भाष्ये तु प्रकृतिवदनुकरणमित्याश्रयणे 'क्षियो दीर्घादि'त्यत्र क्षिय इति स्वाद्युत्पत्तिर्न स्यात्। अधातुरिति निषेधेन प्रातिपदिकसंज्ञाया अभावादिति स्थितम् ॥ २३ ॥

विकरणेभ्यो नियमो बलीयान् ॥ २४ ॥

शबादिभ्य आत्मनेपदं परस्मैपदं च बलवदित्यर्थः । अत्र च ज्ञापकं 'वृद्भ्यः स्यसनोः' (१. ३. ९२) इति सूत्रे स्यग्रहणम् । अन्यथा परस्मैपदात् पूर्वमेव 'स्यतासी लृलुटोः' (३. १. ३३) इति लकारापेक्षस्य प्रत्ययस्य प्रवृत्तेर्[1]निर्बाधत्वात् किं स्यग्रहणेनेति 'अनुदात्त ङित—'(१. ३. १२) इति सूत्रे भाष्ये स्थितम् । 'शदेः शितः'(१. ३. ६०) इति सूत्रे भाष्ये तु विकरणव्यवधानेऽपि नियमप्रवृत्तिः स्यग्रहणेन ज्ञाप्यत इति ध्वनितम् । तेन चिनोति सुनोतीत्यादौ[2] तिपमाश्रित्य 'सार्वधातुकार्धधातुकयोः' (७. ३. ८४) इति गुणो न । किन्तु विकरणस्यापित्[3] सार्वधातुकत्वाद् ङित्त्वे 'कृङिति च' (१. १. ५) इति गुणनिषेधः ॥ २४ ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ २५ ॥

व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणभेदादुभयोरपि

---

१. 'त्तिर्निर्बाधा । तत् किं', २. 'धु', ३. 'दौ विप्रतिषेधमा' ख. पाठः, ३. 'पि सार्व' क. पाठः,

Digitized by Google

शास्त्रयोस्तत्तल्लक्ष्यविषययोरचरितार्थ्येन पर्यायप्रसङ्गे नियमार्थं 'विप्रतिषेधे परं—' (१. ४. २) इति सूत्रमिति पक्ष इदम् । तेन भवतादित्यत्र हेर्न लुक्, तातङा परत्वाद् बाधादिति 'विप्रतिषेधे परमि'ति सूत्रे भाष्ये स्थितम् ॥ २५ ॥

पुनः प्रसङ्गविज्ञानात् सिद्धम् ॥ २६ ॥

तुल्यबलविरोधे 'विप्रतिषेधे परं—' (१. ४. २) इति बाधितस्य पुनः प्राप्तिविज्ञानादिष्टं सिद्धमित्यर्थः । अयं भावः—जातिपक्षे तत्तज्जात्याक्रान्ते क्वचिच्चरितार्थयोर्द्वयोः सत्प्रतिपक्षन्यायेन विरोधस्थलेऽप्रवृत्तौ तत् सूत्रं परविध्यर्थं, न तु पूर्वनिवृत्त्यर्थम् । तस्मिंश्च कृते पूर्वस्य निमित्तसत्त्वे तदपि भवतीति पक्ष इदम् । तेन भिन्धीत्यत्र हेर्धित्वं बाधित्वा परत्वात् तातङि पुनर्धित्वं भवत्येवेति विप्रतिषेधसूत्र एव भाष्ये स्पष्टम् ॥ २६ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः ॥ २७ ॥

अल्पाश्रयबह्वाश्रययोरल्पाश्रयं बलीय इत्यर्थः । अत्र च ज्ञापकम् 'ओमाङोश्च' (६. १. ९५) इत्याङ्ग्रहणम् । अन्यथा सवर्णदीर्घे गुणे च रूपसिद्धौ किं तेनेति 'सम्प्रसारणाच्च' (६. १. १०८) इति सूत्रे विप्रतिषेधसूत्रे च भाष्ये स्पष्टम् ॥ २७ ॥

एतन्मूलकमेव पठ्यते—

Digitized by Google

पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन ॥ २८ ॥

साधनेनेत्यस्य धातूत्तरप्रत्ययार्थेनेत्यर्थः । एतच्च सुड्विधायकसूत्रे भाष्ये ध्वनितम् ॥ २८ ॥

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥ २९ ॥

अर्थः प्राग्वत् । अत्र च ज्ञापकं 'णेरध्ययने वृत्तम्' (७. २. २६) इति निर्देशः । एतच्च 'सुट् कात् पूर्वः' (६. १. १३५) इति सूत्रे भाष्ये स्पष्टम् । पक्षद्वयमपीदं यथायथं लक्ष्यानुरोधाद् व्यवस्थितं बोध्यम् ॥ २९ ॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ ३० ॥

स्पष्टम्[1] । इयं च 'व्यत्ययो बहुलम्' (३. १. ८५) इति सूत्रे बहुलमिति योगविभागेन तत्रैव भाष्ये प्रतिपादिता । 'षष्ठीयुक्तश्छन्दसि वा' (१. ४. ९) इति सूत्रे वेति योगविभागाल्लभ्यत इति शब्दकौस्तुभादिषु स्थितम् ॥ ३० ॥

प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम् ॥ ३१ ॥

'यस्मात् प्रत्ययविधिः—' (१. ४. १३) इति सूत्रे तदादीति योगविभागेनास्यां तदादेरित्यन्तांशो ल-(क्ष्य?भ्य)ते । येन विधिः—' (१. १. ७२) इत्यनेन च

---

१. 'म् व्य' क. पाठः.

Digitized by Google

तदन्तांशः । प्रत्ययाक्षिप्तस्य प्रकृत्यवयवकसमुदायस्य विशेष्यस्य सर्वत्राव्याहतत्वात् । तेन चापाक्षीरोदनमिति वाक्यस्य हरिष्वित्यादौ सोश्च न पदत्वम् । इयं चाङ्गसंज्ञासूत्रे भाष्ये स्पष्टा ॥ ३१ ॥

'येन विधिः—' (१. १. ७२) इत्यत्र च तदपवादः पठ्यते—

प्रत्ययग्रहणे चापञ्चम्याः ॥ ३२ ॥

यत्र पञ्चम्यन्तं प्रत्ययविशेषणं, तत्र तदन्तग्रहणं नेत्यर्थः । तेन यथा 'रदाभ्यां निष्ठातः—'(८. २. ४२) इत्यत्र तदन्तग्रहणाभावः ॥ ३२ ॥

प्रत्ययग्रहणपरिभाषाया अपवादान्तरमाह—

स्त्रीप्रत्यये चानुपसर्जने न ॥ ३३ ॥

विषयसप्तमीयम् । यः शब्दः (स्त्रीप्रत्य?स्त्रि)यं प्राधान्येनाह, तत्र तदादिनियमेन स्त्रीप्रत्ययान्तत्वाभावेऽपि (न?)तदन्तत्वप्रयुक्तकार्यम् । यस्त्वप्राधान्येनाह[1], तस्य च तदादिनियमेन तदन्तत्वप्रयुक्तकार्यं नेति तदर्थः । तेन परमकारीषगन्धीपुत्र इत्यत्र 'ष्यङः—' (६. १. १३) इति सम्प्रसारणम्, अतिकारीषगन्ध्यापुत्र इत्यत्र च न । एतच्च 'ष्यङः सम्प्रसारणमि'ति सूत्रे भाष्ये स्पष्टम् । एतच्चाङ्गसंज्ञासूत्रे 'नेयङुवङ्—'(१. ४. ४) इत्यतो नेत्यस्य 'वामि' (१. ४. ५) इत्यतो वेत्यस्य चानु-

१. 'प्रधानत्वेना' क. पाठः.

Digitized by Google

वर्तनेन व्यवस्थितविभाषाश्रयणाल्लभ्यत इति वदन्ति ॥ ३३ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ ३४ ॥

स्पष्टम् । एतच्च 'सुप्तिङन्तं —' (१. ४. १४) इत्यन्तग्रहणेन ज्ञाप्यत इति 'सुप्तिङन्तमि'ति सूत्रे भाष्ये स्पष्टम् । तेन 'तरप्तमपौ घः' (१. १. २२) इत्यनेन प्रत्यययोरेव संज्ञा, न तदन्तस्य ॥ ३४ ॥

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ ३५ ॥

'प्रत्ययग्रहण' इत्यस्यायमपवाद इत्यङ्गसंज्ञासूत्रे भाष्ये स्पष्टम् । 'गतिरनन्तरः' (६. २. ४९) इति सूत्रेऽनन्तरग्रहणमस्य ज्ञापकम् । तद्धि अभ्युद्धृतमित्यादौ व्यवहितनिरासाय । अन्यथा व्यवहिते प्राप्तेरेवाभावादनन्तरग्रहणं व्यर्थं स्यादिति 'गतिरनन्तर' इति सूत्रे भाष्ये स्थितम् । अपिशब्देन प्रत्ययग्रहणपरिभाषालब्धार्थः[1] समुच्चीयते । एतदभावे हि तयैव व्यवस्था स्यादित्येतावतापवादत्वव्यवहारः । न चैवं ल्यब्विधायकसूत्रस्थेनानयोः सावकाशत्वप्रतिपादकेन द्वयोः सावकाशयोः[2] समवस्थितयोरित्यादिभाष्येण सह विरोध इति वाच्यम् । परस्परं बाध्यबाधकभावमात्रे तात्पर्यादिति भाष्यतत्त्वविवेके प्रपञ्चितमस्माभिः ॥३५॥

---

१. 'र्थाथः' ख. पाठः. २. 'काभा' क. पाठः.

Digitized by Google

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ ३६ ॥

पदाधिकारे अङ्गाधिकारे च विधीयमानं कार्यं तस्य च तदन्तस्य चेत्यर्थः । तेन अतित्वाम् अतिमां निर्जरस इत्यादिसिद्धिः । इदं च 'येन विधिः —' (१. १. ७२) इत्यत्र भाष्ये स्पष्टम् ॥ ३६ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ३७ ॥

सप्तमीपञ्चम्योर्निर्देशे 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१. १. ६६) इति सूत्रापेक्षया 'तस्मादित्युत्तरस्य' (१. १. ६७) इत्यस्य परत्वात् प्रबलत्वमित्यर्थः । तेन 'डः सि धुट्' (८. ३. २९) इत्यत्र डात् परस्य सस्य धुडित्यर्थलाभः । एतच्च 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति सूत्रे भाष्ये स्पष्टम् ॥ ३७ ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ३८ ॥

प्रातिपदिकग्रहण इति बहुव्रीहिः । प्रातिपदिकं गृह्यते यस्मिन् शास्त्रे, तत् प्रातिपदिकग्रहणम् । तत्र लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणमित्यर्थः । तेन अयस्कुम्भीत्यत्र 'अतः कृकमिकंस—' (८. ३. ४६) इति सत्वम् । श्वश्रूरित्यप्युदाहरणम् । अत्र च ज्ञापकं 'कुमारः श्रमणादिभिः' (२. १. ७०) इत्यत्र स्त्रीलिङ्गश्रमणाशब्दपाठः ।

---

१. 'स्य त' ख. पाठः. २. 'शे त' क पाठः.

Digitized by Google

अपिशब्दात् केवलस्यापि । इयं च यत्र लिङ्गप्रत्ययरहितस्य प्रातिपदिकत्वं, तत्रैवेत्यर्थः । इयं च 'शक्तिलाङ्गला —' (वा० ३. २. ९) इति वार्त्तिके घटघटीग्रहणादनित्या । एषा ङ्याप्सूत्रे भाष्ये स्पष्टा ॥ ३८ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ ३९ ॥

विभक्तौ परतः प्रातिपदिकस्य विधीयमानं कार्यं लिङ्गविशिष्टस्य न भवतीत्यर्थः । लिङ्गविशिष्टपरिभाषानित्यत्वमूलिकेयम् । एषा च 'युवोरनाकौ' (७. १. १) इति सूत्रे भाष्ये स्पष्टा ॥ ३९ ॥

लिङ्गवचनमतन्त्रम् ॥ ४० ॥

व्याख्यानमूलिका चैषा । अत एव क्वचिद् विवक्ष्यते । यथा 'सुप्सुपे'ति ॥ ४० ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ४१ ॥

स्वस्मादन्यस्मिन् स्वसदृशेऽधिकरणे द्रव्ये वर्तते । हि यतः तथार्थगतिरस्ति । तथा प्रत्ययोऽस्तीत्यर्थः । न्यायसिद्धेयम् । अत एव भाष्ये 'न ह्यब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवति' इत्युक्तम् । 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इत्युदाहरणम् । यथा वा 'अर्थवदधातुः —' (१. २. ४५) इति । अत्राधातु-

---

१. 'ति । लि', २. 'थार्थ' क. पाठः

Digitized by Google

रिति पर्युदासादेवार्थवत्त्वलाभादर्थवद्ग्रहणस्योत्तरार्थत्वसिद्धिरित्यादि मनोरमायां स्पष्टम् । 'ओषधेश्च विभक्तावप्रथमायाम्' (६. ३. १३२) 'अकर्त्तरि च कारके संज्ञायाम्'(३. ३. १९) इत्यादौ विभक्तिकारकग्रहणाभ्यामस्या अनित्यत्वं ज्ञाप्यते । अन्यथा अप्रथमायामकर्त्तरि चेति पदादेव विभक्तिकारकलाभात् तदुपादानवैयर्थ्यापत्तेरिति भाष्ये स्पष्टम् ॥ ४१ ॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥ ४२ ॥

गतिकारकोपपदानां कृदन्तेनैव सुबुत्पत्तेः प्राक् समासो वक्तव्य इत्यर्थः । इयं च 'उपपदमतिङ्' (२. २. १९) इत्यतिङ्ग्रहणेन, 'कर्तृकरणे कृता बहुलम्' (२. १. ३२) इति बहुलग्रहणेन च सिद्धा । तेन च व्याघ्री अश्वक्रीतीत्यादिसिद्धिः । 'अम्बाम्ब —' (८. ३. ९७) इति सूत्रे गवादिग्रहणादनित्येयम् । अन्यथा गोष्ठ इत्यादौ 'सुपि स्थः' (३. २. ४) इति कप्रत्यये 'गतिकारकोपपदानामि'ति सुबुत्पत्तेः पूर्वं समासे 'सात्पदाद्योः' (८.३.१११) इति निषेधाप्राप्त्या 'आदेशप्रत्यययोः' (८. ३. ५९)इत्येव सिद्धे तदुपादानवैयर्थ्यात् । 'अम्बाम्बे'त्यत्र हि लक्षणप्रतिपदोक्तपरिभाषया 'सुपि स्थ' इति विहित-

---

१. 'त्यनेनाति' क. पाठः. २. 'स्त' ख. पाठः. ३. 'दिरिति प' क. पाठः.

Digitized by Google

कप्रत्ययान्त एवानुक्रियत इति सिद्धान्तः । इयं च पदस्यादिः[1] पदादिरिति व्याख्यानपक्षे बोध्यम् । इयं च 'पुंयोगादाख्यायाम्' (४. १. ४८) इत्यत्र[2] भाष्ये स्पष्टा[3] ॥ ४२ ॥

परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते ॥ ४३ ॥

अपवादविषयं मुक्त्वोत्सर्गः प्रवर्तत इत्यर्थः । अपवादवैयर्थ्यापत्तिन्यायमूलिकेयम् । इयं च प्रातिपदिकार्थसूत्रे भाष्ये स्पष्टा ॥ ४३ ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ४४ ॥

अपवादविषयेऽपवादस्यान्येन निषेधेऽप्युत्सर्गो भवतीत्यर्थः । यथा रामावित्यत्र वृद्ध्यपवादभूतस्य पूर्वसवर्णदीर्घस्य 'नादिचि' (६. १. १०४) इति प्रतिषेधेऽपि वृद्धिः । 'तौ सत्' (३. २. १२७) इति निर्देशोऽत्र लिङ्गम् । 'इको गुणवृद्धी' (१. १. ३) इति सूत्रे भाष्ये स्पष्टेयम् । दिग्यादेशविषये द्वित्वप्रवृत्त्यभावात् क्वचिदिति ॥ ४४ ॥

असति सम्भवे बाधनं भवति ॥ ४५ ॥

उत्सर्गापवादयोरेकत्र सम्भवाभावे बाध्यबाधकभाव इष्यते, विरोधस्य बाध्यबाधक(भाव)नियामकत्वादिति भावः । तेन रामेभ्य इत्यत्रैत्वेन 'सुपि च' (७. ३. १०२) इति दीर्घत्वं बाध्यते । इयं च न्यायसिद्धेति स्पष्टमाकरे ॥ ४५ ॥

---

१. 'दिरिति प' क. पाठः. २. 'ति सूत्रे भा', ३. 'ष्टा ॥ क' ख. पाठः.

Digitized by Google

अत्रैवोद्बलकमाह —

अस्ति च सम्भवो यदुभयं स्यात् ॥ ४६ ॥

चशब्दश्चेदर्थे । सम्भवोऽस्ति चेदुभयं भवेदेवेत्यर्थः । तेन तथाजातीय इत्यत्र थाल्जातीययोः सम्भवः ॥ ४६ ॥

नन्वेवमौपगव इत्यादावादिवृद्ध्यान्त्यवृद्धिबाधो न स्यादित्याह —

सत्यपि सम्भवे बाधनं भवति ॥ ४७ ॥

स्पष्टम् । तक्रकौण्डिन्यन्यायमूलकमेतत् । एतत्त्रयमपि 'मिदचोऽन्त्यात् परः' (१. १. ४७) इति सूत्रे भाष्ये स्पष्टम् ॥ ४७ ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ४८ ॥

प्राप्त इति भावे क्तः । यत्कर्तृकावश्यम्प्राप्तौ यो विधिरारभ्यते, स तस्य नित्यं बाधक इत्यर्थः । अत्र येनेत्यस्य यदि स्वेतरेणेत्यर्थः, तदा स्वविषये प्राप्तमात्रस्य बाधः । एषैव बाध्यसामान्यचिन्तेत्युच्यते । यदा तु यद्धर्मावच्छिन्नकार्यविशेषेणेत्यर्थः, तत् कार्यं केन विहितमिति जिज्ञासा च, तदा बाध्यविशेषचिन्ता । यथा 'एत्येधत्यूठ्सु' (६. १. ८९) इत्यत्र परूपबाधकत्वे ज्ञाते केन विहितस्येति । यथा वा नासि-

---

१. 'कः ।', २. 'य के' ख. पाठः.

Digitized by Google

कोदरोष्ठ—' (४. १. ५५) इति ङीष् निषेधत्वावच्छिन्नं प्रति बाधकः ॥ ४८ ॥

केन विहितस्य बाधकमिति व्यवस्थाकाङ्क्षायामाद्यव्यवस्थापकमाह —

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ४९ ॥

समीपस्था अपवादाः सन्निहितानेव बाधन्ते, न विप्रकृष्टानित्यर्थः । यथा 'एत्येधत्यूठ्सु' (६. १. ८९) इति वृद्धिः एङि पररूपस्यैव बाधिका, न तु 'ओमाङोश्च' (६. १. ९५) इति स्पष्टं सिद्धान्तकौमुद्यादौ । प्रथमातिक्रमे कारणाभावादिति न्यायमूलिकेयम् ॥ ४९ ॥

द्वितीय आह —

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ५० ॥

स्पष्टम् । इयमपि पूर्वोक्तन्यायमूलिका । तेन 'नासिकोदरोष्ठ—'(४. १. ५५) इत्यत्र ओष्ठादिषु पञ्चस्वसंयोगोपधादित्येव बाध्यते, विप्रतिषेधशास्त्रबाधे मानाभावात् । 'बहुव्रीहेरूधस—' (४. १. २५) इत्यस्य 'अन उपधालोपिनः—' (४. १. २८) इत्यत्रानुवृत्तये कृतं स्वरितत्वप्रतिज्ञानं ज्ञापकमपि । तद्धि अनेन न्यायेन पूर्वयोर्ङीप्प्रतिषेधयोरेव बाधकं स्यात्, न तु परस्य 'अन उपधे'त्यस्येति कुण्डोध्नीत्यादौ परत्वान्ङीष्-

---

१. 'षि विषये वि' क. पाठः.

Digitized by Google

विकल्प एव स्यात् । स मा भूदित्येवमर्थमिति दिक् । स्पष्टं चेदम् 'आवट्याच्च' (४. १. ७५) इति सूत्रे भाष्ये । यदि तु कार्यद्वयं नैकधर्मावच्छिन्नं, तदोभाभ्यां भिन्नधर्मावच्छिन्नाभ्यां केनापि रूपेण येन नाप्राप्तन्यायस्याभावान्नानयोर्विषयः । स्पष्टं चेदम् 'इको गुणवृद्धी' (१. १. ३), 'इको झल्' (१. २. ९), 'नासिकोदरौष्ठ—'(४. १. ५५), 'एत्येधति—' (६. १. ८९) इत्यादौ भाष्यकैयटकौस्तुभादिष्विति सङ्क्षेपः ॥ ५० ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ५१ ॥

विधिप्रतिषेधौ सन्निहितस्यैव भवत इत्यर्थः । तेन 'ऋतो भारद्वाजस्य' (७. २. ६३) इति भारद्वाजनियमप्रापितो निषेधः 'अचस्तास्वत्—'(७. २. ६१) 'उपदेशेऽत्वतः'(७. २. ६२)इति योगद्वयप्रापितस्यैव निषेधस्य, न तु क्र्यादिनियमप्रापितस्येति सिद्धान्तकौमुदीमनोरमातत्त्वबोधिन्यादिषु स्पष्टम् । अत्र च ज्ञापकमाद्येंऽशे 'संख्याव्ययादेर्ङीप्'(४. १. २६) इति ङीब्वचनम् । तद्धि अनन्तरस्य ङीष एव विधिर्मा भूदिति क्रियते । अन्त्ये तु 'न क्तिचि दीर्घश्च'(६.४.३९)इति सूत्रे दीर्घग्रहणम् । तद्धि अनन्तरस्य 'अनुदात्तोपदेश—'(६. ४. ३७) इत्यस्यैव निषेधो मा भूदित्येतदर्थमिति सीरदेवीयपरिभाषावृत्त्यादिषु स्पष्टम् । इयमुपस्थितिन्यायमूला चेति ध्येयम् ॥ ५१ ॥

---

१. 'स्य भ', २. 'स्य प्रा' क पाठः

Digitized by Google

अभ्यासविकारेषु बाध्यबधकभावो नास्ति ॥ ५२ ॥

'अत्र लोपोऽभ्यासस्य' (७. ४. ५८) इत्यारभ्य विधीयमानकार्येषु बाध्यबाधकभावो नास्तीत्यर्थः । तेन दित्स्यं धित्स्यमित्यादावभ्यासादिलोपः । अत्र च ज्ञापकं 'दीर्घोऽकितः' (७. ४. ८३) इत्यकिद्ग्रहणम् । अन्यथा पम्प(स्य?इय)त इत्यत्र 'जपजभ—' (७. ४. ८६) इति नुकि कृतेऽनजन्तत्वाद् दीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेति भाष्ये स्पष्टम् । इयं च परा(न्तर)ङ्गत्वादिबाधाभा(वे?व)स्यापि बोधिका। यत्तु सर्वेषां प्रवृत्तावेवैतत्प्रवृत्तिरिति कैयटः, तन्न । नुकि कृते दीर्घाप्राप्त्या धर्मिग्राहकमानविरोधापत्तेः, मान्बधादीनां दीर्घे कृते इत्वाप्राप्त्या 'गुणो यङ्लुकोः' (७. ४. ८२) इति सूत्रे मीमांसते अचीकरदित्यादिना भाष्योक्तोदाहरणासङ्गतेश्चेति संक्षेपः ॥ ५२ ॥

ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ५३ ॥

ताच्छील्यार्थेषु विहितप्रत्यये वासरूपपरिभाषा न प्रवर्तत इत्यर्थः। अत्र च ताच्छीलिकेष्विति विषयसप्तमी । तेन ताच्छीलि(कविकृतोच्छीलि?कानामताच्छीलिकैः) वासरूपविधिर्नेत्यर्थः । एतच्च 'जुचङ्क्रम्य—' (३. २. १५०) इति सूत्रे भाष्ये स्पष्टम् । अत्र च ज्ञापकं निन्दाहिंसादि (३. २. १४६) सूत्रेण वुञ्विधानम् । अन्यथा ण्वुलैव सिद्धे किं तेनेत्यन्यत्र विस्तरः । इयं

Digitized by Google

चानित्या । 'सूददीप—' (३. २. १५३) इत्यनेन युच्प्रतिषेधात् । अन्यथा 'नमिकम्पि—' (३. २. १६७) इति रप्रत्ययेनैव तद्बाधे सिद्धे किं तेनेति स्पष्टं भाष्यतत्त्वविवेके ॥ ५३ ॥

क्त्वल्युदतुन्मुखलर्थेषु वासरूपविधिर्नास्ति ॥ ५४ ॥

स्पष्टम् । अत्र च ज्ञापकं, 'अर्हे कृत्यतृचश्च' (३. ३. १६९) इति सूत्रे कृत्यतृचोर्ग्रहणम् । तद्धि समुच्चितलिङा कृत्यतृचोर्बाधा माभूदित्येतदर्थम् । यदि च वासरूपविधिः स्यात्, किं तदुपादानेन । तथाच वासरूपविधेरनित्यत्वं ज्ञाप्यत इति फलितम् ॥ ५४ ॥

साम्प्रतिकाभावे भूतपूर्वगतिः ॥ ५५ ॥

तात्कालिककार्यप्रयोजकीभूतधर्मानवच्छिन्नत्वे पूर्वं विद्यमानत्वमादाय शास्त्रं प्रवर्तनीयमित्यर्थः । न्यायसिद्धेयमित्येके । वस्तुतस्तु 'अचो यद्' (३. १. ९७) इति सूत्रस्थाज्ग्रहणमस्य ज्ञापकम् । अन्यथा 'ऋहलोर्ण्यद्' (३. १. १२४) इति हलन्तेभ्यो ण्यत्प्रत्ययस्य विधानादन्तरेणाप्यज्ग्रहणं परिशेषाद(जादेरे?जन्तादे)व यत्प्रत्ययो भविष्यतीति किमज्ग्रहणेन । तत् क्रियमाणं भूतपूर्वाजन्तस्यापि यत्प्रत्ययविधानार्थं सम्पद्यते । तेन धाञो दाञश्च सनि द्वित्वे 'सनि मीमाघु—' (७. ४. ५४) इति इसि अभ्यासस्य 'अत्र लोपोऽभ्यासस्य'

Digitized by Google

(७. ४. ५८) इति लोपे 'सः स्यार्धधातुके' (७. ४. ४९) इति तत्वेऽनुत्पन्नार्धधातुकेऽतोलोपे हलन्तत्वात् प्राप्तं ण्यतं बाधित्वा भूतपूर्वाजन्तत्वमादाय 'अचो यद्' (३. १. ९७) इति यत्प्रत्यये 'यतोऽनावः' (६. १. २१३) इत्याद्युदात्तत्वसिद्धिरिति संक्षेपः । विस्तरस्तु वैयाकरणसिद्धान्तरहस्याख्यास्मत्कृतसिद्धान्तकौमुदीव्याख्यानेऽनुसन्धेयः । एषा च 'नामि' (६. ४. ३) इत्यादिसूत्रस्थभाष्ये स्फुटा ॥ ५५ ॥

भवति (हि) बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ५६ ॥

तेषां गुणानामवयवपदार्थानां संविज्ञानं विशेष्यान्वयिनान्वयित्वं बहुव्रीहौ भवतीत्यर्थः । अपिना अतद्गुणसंविज्ञानमपि । हिशब्दः प्रसिद्धौ । तेन संयोगसमवायान्यतरसम्बन्धेन सम्बन्धी यत्रान्यपदार्थः, प्रायस्तत्र तद्गुणसंविज्ञानत्वम् । यथा लम्बकर्णमानय, यथा वा चित्रगुमानयेति । एतच्च 'सर्वादीनि—' (१. १. २७) इति सूत्रे भाष्ये स्पष्टम् ॥ ५६ ॥

चानुकृष्टं नोत्तरत्र ॥ ५७ ॥

चकारेणानुकृष्टं नोत्तरत्रानुवर्तत इत्यर्थः । अत्र च ज्ञापकं णमुल्यनुवर्तमाने 'अव्ययेऽयथाभिप्रेता—' (३. ४. ५९) इति सूत्रे पुनर्णमुल्ग्रहणम् । अन्यथा त्क्वा चेत्युक्तावप्युत्तरत्रोभयोः सम्बन्धसिद्धौ किं तेन । इयं

Digitized by Google

चानित्या, 'तयोरेव कृत्यक्तखलर्थाः' (३. ४. ७०) इति सूत्रे एवकारग्रहणात् । तद्धि कर्त्रर्थव्यवच्छेदार्थं क्रियते । यदि च चानुकृष्टमुत्तरत्र न स्यात् । 'लः कर्मणि च—' (३. ४. ६९) इत्यत्रा(पि) कर्तुश्चानुकृष्टत्वादुत्तरत्राप्राप्तौ किमेवकारेणेत्यस्मत्कृतपाणिनीयदीपिकायां स्पष्टम् ॥ ५७ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ५८ ॥

अल्पाश्रयकार्ये कर्तव्ये बह्वाश्रयमसिद्धमित्यर्थः । तेन पचावेदं पचामेदमित्यादौ बहिरङ्गैकादेशगुणस्यासिद्धत्वादन्तरङ्गैत्वाभावः । अत्र च ज्ञापकं 'वाह ऊठ्' (६. ४. १३२) इत्यूठ्ग्रहणम् । तद्धि विश्वौह इत्यादिसिद्ध्यर्थम् । यदि चेयं न स्यात् । वाहः सम्प्रसारणमित्युक्तावपि सम्प्रसारणाच्चेति पूर्वरूपत्वे वृद्धौ च विश्वौह इति रूपसिद्धौ किमूठ्ग्रहणेन । सत्यां ह्यस्यां बहिरङ्गसम्प्रसारणस्यासिद्धतया रूपासिद्धिः स्पष्टैव । एतच्च विप्रतिषेधसूत्रे भाष्ये स्पष्टम् । इयं चोत्तरपदाधिकारे न प्रवर्तत इति 'इच एकाचोऽम्—' (६. ३. ६८) इति सूत्रे भाष्ये स्पष्टम् । इयं च सापवादेति 'अन्तरङ्गं बलीय' इति परिभाषान्तरं प्राक् पठितम् । अनयैव निर्वाहे 'अन्तरङ्गं बलीय' इति परिभाषा न कार्येत्यपि विप्रतिषेधसूत्रे भाष्ये स्पष्टम् ॥ ५८ ॥

Digitized by Google

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ५९ ॥

बहिरङ्गपरिभाषापवादोऽयम् । यत्रान्तरङ्गे बहिरङ्गे वाचोरानन्तर्यमाश्रीयते, तत्र बहिरङ्गपरिभाषा न प्रवर्तत इत्यर्थः । अत्र च ज्ञापकं 'षत्वतुकोरसिद्धः' (६. १. ८६) इति सूत्रम् । तद्धि कोऽसिचत् कोऽस्येत्यादौ षत्वनिवारणार्थं क्रियते । यदि चासिद्धपरिभाषा प्रवर्तेत, बहिरङ्गत्वेनैकादेशस्यासिद्धतया षत्वाप्राप्तेः किं सूत्रेण । तत् क्रियमाणं 'नाजानन्तर्ये'ति परिभाषां ज्ञापयति । अत्र चाचोरिति द्वित्वं विवक्षितम् । तेनान्तरङ्गे बहिरङ्गे वाचोरानन्तर्यमाश्रीयते (यत्र) तत्रैवेयं परिभाषा प्रवर्तत इति हरदत्तः । तन्न । पचावेदमित्यादौ एत ऐत्वमाशङ्क्य बहिरङ्गत्वेन गुणस्यासिद्धत्वादिति स्थलान्तरीयस्वग्रन्थविरोधात् । किञ्च, बहिरङ्गस्यासिद्धताबलेन प्रेद्धमित्यादिसिद्धिरिति प्रतिपादनपरनधातुलोपसूत्रस्थभाष्यविरोधापत्तेश्च । तस्माद् धर्मिग्राहकमानानुरोधेनोत्तरकालप्रवृत्तकार्ये यत्राजानन्तर्यं, तत्र 'नाजानन्तर्य' इति निषेधः । अस्ति ह्युत्तरकालप्रवृत्तकार्ये षत्वेऽजानन्तर्याश्रयणम्, इणः परस्य सस्येत्युक्तेः । एतच्च न धातुलोपसूत्रे (१.१.४) 'अचः परस्मिन्—' (१. १. ५७) इति सूत्रे च शब्दकौस्तुभे विप्रतिषेधसूत्रे (१. ४. २) भाष्ये च स्पष्टम् ॥ ५९ ॥

Digitized by Google

वार्णादाङ्गं बलीयः ॥ ६० ॥

युगपत् प्रवृत्तौ समानाश्रये च वार्णापेक्षयाङ्गं बलवदित्यर्थः । युच्छतीत्यत्र गुणवारणाय युगपत्पदम् । कार इत्यादावतिव्याप्तिवारणाय समानाश्रय इति । तेनोहतुरित्यादौ सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद् ह्व(स्वात् ? स्वः) प्राप्तो न भवति, सकृत् प्रवृत्तत्वात् । आङ्गत्वाद्धि पर्जन्यवल्लक्षणप्रवृत्तौ ह्रस्वे कृते ततो दीर्घः, 'वार्णादाङ्गं बलीय' इति न्यायाद् इति सिद्धान्तकौमुदी। (व्याख्याता?) अत्र च 'अङ्गस्य' (६.४.१) 'आडजादीनाम्' (६.४.७२) इत्यादिसूत्रस्थभाष्ये व्याश्रयाणामपि प्रयोजनानामुपन्यासात् समानाश्रयत्वविशेषणमनावश्यकमित्याहुः । इयं च परिभाषा 'अभ्यासस्यासवर्णे'(६. ४. ७८) इत्यसवर्णग्रहणेन ज्ञापितेति षष्ठे प्रथमाह्निकान्ते भाष्ये स्थितम् । तद्धि ईषतुरूषतुरित्यादिवारणाय नोपयुज्यते, अन्तरङ्गेण संवर्णदीर्घेणेयङुवङोर्बाधात् । अतश्च क्रियमाणमसवर्णग्रहणम् (बहिरङ्ग ? इमां) परिभाषां ज्ञापयति । अनित्या चेयं, 'च्छ्वोः शूडनुनासिके च' (६. ४. १९) इति सूत्रे सतुक्कग्रहणात् । स हि तुकः श्रवणं मा भूदिति क्रियते । यदि च पूर्वं शादेशः स्यात् । ततस्तुकोऽप्राप्तेस्तद्वैय्यर्थ्यं स्पष्टमेवेति 'येन विधिः'(१. १. ७२) इति सूत्रे कैयटे 'अचः परस्मिन्—' (१. १. ५७) इति सूत्रे कौस्तुभे च विस्तरेण प्रपञ्चितम् ॥ ६० ॥

अकृतव्यूहाः पाणिनीयाः ॥ ६१ ॥

Digitized by Google

विशिष्ट ऊहो येषां ते व्यूहाः । अकृताश्च ते व्यूहाश्चाकृतव्यूहाः । निमित्तनिर्णयविरहे कार्यं न कुर्वन्तीत्यर्थः । अस्याश्च ज्ञापकं 'गोरतद्धितलुकि' (५. ४. ९२) इति सूत्रस्थातद्धितग्रहणम् । तद्धि राजगवीयतीत्यादौ सुपो लुकः सत्त्वेन टज्निषेधो माभूदिति क्रियते । अन्यथान्तरङ्गत्वाट्टच्सिद्धौ किं तेन । अस्याश्च प्रवृत्तौ निमित्तविनाशसम्भावनैव निमित्तं, न तु विनाश इति ध्येयम् । 'समर्थानां प्रथमाद्—' (४. १. ८२) इत्यत्र समर्थग्रहणमपि ज्ञापकमिति दिक् । इयं चानित्या, 'अल्लोपोऽनः' (६. ४. १३४) इति सूत्रे तपरकरणात् । तद्धि अनितेः क्विप्यानित्यत्र लोपाभावाय क्रियते । अन्यथा दीर्घाभावे लोपसम्भावनासत्त्वेनानया तदप्रवृत्तौ तद्वैय्यर्थ्यं स्पष्टमेवेत्याहुः ॥ ६१ ॥

अन्तरङ्गापि विधीन् बहिरङ्गो ल्यब् बाधते ॥ ६२ ॥

स्पष्टम् । 'अदो जग्धिर्ल्यप् ति किति' (२. ४. ३६) इति सूत्रे ल्यब्ग्रहणमत्र ज्ञापकमिति तत्रैव सूत्रे भाष्ये स्पष्टम् ॥ ६२ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ॥ ६३ ॥

स्पष्टम् । तेन गोमत्प्रिय इत्यादिसिद्धिः । अन्यथा लुकः प्रागन्तरङ्गप्रवृत्तौ नुम् स्यात् । अत्र च ज्ञापकं 'प्रत्ययोत्तरपदयोश्च' (७. २. ९८) इति सूत्रे उत्तरपदग्रहणम् । प्रत्ययग्रहणं त्वाचारक्विबन्तादौ चरितार्थम् । न च तदपि

Digitized by Google

तव पुत्रस्त्वत्पुत्र इत्यादौ तवममादिबाधनेन चरितार्थमिति वाच्यम्। 'त्वमौ—' (७. २. ९७) इति सूत्रे मपर्यन्तस्यैव स्थानित्वनिर्णयेनाधिकस्य स्थानित्वे मानाभावेन सर्वादेशत्वाभावे सिद्धे पुनर्मपर्यन्तानुवृत्तिर्वाक्यभेदेन पुनर्विधानार्थास्यार्थस्य ज्ञापिकेति भाष्ये स्पष्टम्। इयं च न सामासिकलुङ्मात्रविषया, किन्तु लुङ्मात्रविषयैव। अन्यथा 'एङ्ह्रस्वात् सम्बुद्धेः' (६. १. ६९) 'न यासयोः' (७. ३. ४५) इत्यादिसूत्रस्थाकरविरोधापत्तेः। तथा च लुक्स्थानिभूतप्रत्ययनिमित्तकान्तरङ्गकार्यापेक्षयैव लुकः प्राबल्यमनया बोध्यते, धर्मिग्राहकमानात् प्रत्यासत्तेश्चेति। इयमप्यकृतव्यूहपरिभाषान्तर्गतैवेति ध्येयम्॥ ६३॥

निमित्तापाये नैमित्तिकस्याप्यपायः॥ ६४॥

स्पष्टम्। यथापेक्षाबुद्धिनाशे द्वित्वनाशो न्यायनये, प्रारब्धनाशाद् विक्षेपनाशो वेदान्तिनां, तथेति भावः। 'घुमास्था—' (६. ४. ६६) इति निर्देशोऽपि ज्ञापकः। इयमपि 'अकृतव्यूहा' इत्यस्या एव प्रपञ्चः॥ ६४॥

कृतमपि निवर्तयन्ति॥ ६५॥

इत्येषाप्येवमेव॥ ६५॥

उपजनिष्यमाणनिमित्तोऽप्यपवाद उपजातनिमित्तमप्युत्सर्गं बाधते॥ ६६॥

कालान्तरभाविनिमित्तोपजीव्यपवादः कृतनिमित्तमपि सामान्यं बाधत इत्यर्थः। तेन दधतीत्यत्रान्ता-

Digitized by Google

देशं बाधित्वाभ्यस्ताश्रयोऽदादेश एव। इयमप्यकृतव्यूह-परिभाषान्तर्गतैव, अपवादविषयाभावस्यापि निमित्त-कोटौ प्रवेशात्। स्पष्टं चैतद् 'उभेऽभ्यस्तम्' (६. १. ५) इति सूत्रे भाष्ये ॥६६॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥६७॥

स्वरोद्देश्यक(विधा?)विधावित्यर्थः। इदं च 'समा-सस्य' (६. १. २२३.) इति सूत्रे भाष्ये स्पष्टम्। 'नोत्तरपदे-ऽनुदात्तादौ—' (६. २. १४२) इत्यत्रेयं ज्ञापितेति स्पष्टं तत्रैव ॥६७॥

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥६८॥

स्पष्टम्। 'यतोऽनावः' (६. १. २१३) इत्यत्रानाव इति प्रतिषेधोऽस्य ज्ञापक इति स्पष्टं तत्रैव ॥६८॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥६९॥
तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥७०॥

केवलोपादानेऽनुबन्धसहितस्यान्यानुबन्धकग्रहणे ह्यनुबन्धविशिष्टस्य च ग्रहणं नेत्यर्थः। अनयोश्च ज्ञापकं 'वामदेवाड्ड्यड्ड्यौ' (४. २. ९) इत्यत्र ड्यड्ड्ययोर्डित्त्वम्। तद्धि 'यतोश्चातदर्थे' (६. २. १५६) इत्यत्रानयोरग्रह-णार्थं सत् परिभाषाद्वयं ज्ञापयतीति 'वामदेवाड्ड्यड्ड्यौ' इति सूत्रे भाष्ये स्पष्टम्। 'दिव औत्' (७. १. ८४) इत्यत्रास्य भाष्ये सञ्चारितत्वात् प्रत्यया-

Digitized by Google

प्रत्ययविषयेय(मिति) वदन्ति । वर्णग्रहणे चैतयोरप्रवृत्तिरिति 'औङ आपः' (७. १. १८) इति सूत्रे भाष्ये स्पष्टम् ॥ ७० ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ७१ ॥

प्रत्ययविधौ गृह्यमाणेन प्रातिपदिकेन 'येन विधिः —' (१. १. ७२) इति प्राप्तस्तदन्तविधिर्नेत्यर्थः । इयं च 'समासप्रत्ययविधौ प्रतिषेध' इत्यार्थिकार्थानुवादिका । अत एव स्वस्रादौ तदन्तविधिः सङ्गच्छते । अत एव 'येन विधिरि'ति सूत्रे भगवता नेयमुक्ता । एतच्च 'असमासे निष्कादिभ्यः' (५. १. २०) इति सूत्रे भाष्यकैयटयोः स्पष्टम् । अस्याश्च ज्ञापकं 'पूर्वादिनिः' (५. २. ८६) इत्येव सिद्धे 'सपूर्वाच्च' (५. २. ८७) इति सूत्रम् ॥ ७१ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ७२ ॥

गृह्यमाणेन प्रातिपदिकेन व्यपदेशिवद्भावो नास्तीत्यर्थः । प्रत्ययविषया चेयम् । 'पूर्वादिनिः' (५. २. ८६) 'सपूर्वाच्च' (५. २. ८७) इति योगविभागकरणमस्या ज्ञापकमिति 'येन विधिः—' (१. १. ७२) इत्यत्र भाष्ये स्पष्टम् ॥ ७२ ॥

स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ७३ ॥

Digitized by Google

'णचः स्त्रियामञ्' (५. ४. १४) इत्यत्र स्त्रियांग्रहणं ज्ञापकमस्याः । अन्यथा 'कर्मव्यतिहारे णच् स्त्रियाम्' (३. ३. ४३) इति णचः स्त्रियामेव विधानात् किं स्त्रियामित्यनेन ॥ ७३ ॥

समासान्तविधिरनित्यः ॥ ७४ ॥

'प्रतेरंश्वादयस्तत्पुरुषे' (६. २. १९३) इति सूत्रेऽन्तोदात्तार्थम् अंश्वादिषु राजञ्छब्दस्य पाठोऽस्या ज्ञापकः । अन्यथा 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति टचि चित्त्वादेवोदात्तत्वे सिद्धे किं तदुपादानेनेति वृद्धिसूत्रे शब्दकौस्तुभे स्पष्टम् ॥ ७४ ॥

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ७५ ॥

सन्निपातो द्वयोः सम्बन्धः, तन्निमित्तो यो विधिः स तयोः सन्निपातविघातकविधेरनिमित्तमित्यर्थः । तेन शतानि सहस्राणीत्यत्र नुमि कृते नान्तत्वात् 'ष्णान्ता षट्' (१. १. २४) इति प्राप्ता षट्संज्ञा न भवति, विभक्तिसन्नियोगेन जातस्य नुमः षट्संज्ञाप्रयोजकत्वे सति 'षड्भ्यो लुक्' (७. १. २२) इति लुकि विभक्तिसन्निपातविघातकत्वापत्तेः । अत्र च ज्ञापकं 'वामि ह्रस्वश्चे'ति सूत्रमकृत्वा 'वामि' (१. ४. ५) 'ङिति ह्रस्वश्च' (१. ४. ६) इति सूत्रद्वयकरणम् । तद्धि भ्रूणामित्यादौ नुड् यथा स्यादित्येतदर्थम् । नुटि अजादिप्रत्ययसम्बन्धस्य

Digitized by Google

विनाशाद् यादृशानुपूर्वीसम्बन्धेन कार्यं, तादृशानुपूर्वीसम्बन्धविनाशेऽप्येषा प्रवर्तत इति स्पष्टं 'कृन्मेजन्तः' (१. १. ३९) इति सूत्रे भाष्ये । इयं चानित्या, 'कष्टाय क्रमणे' (३. १. १४) इत्यादिनिर्देशात् । अन्यथाकारान्तसन्निपातेन यादेशस्यादन्तविघातकत्वायोगात् । तेन दाक्षिरित्यादावकारान्ताज्जातस्येञोऽङ्गसंज्ञानिमित्तत्वेनाङ्गसंज्ञाया अल्लोपनिमित्तत्वं नेति 'कृन्मेजन्त' इति सूत्रे भाष्ये स्पष्टम् ॥ ७५ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणम् ॥ ७६ ॥

आटिटदित्यादौ णिलोपवारणाय द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्ताज्जुहुधीत्यादौ कृते द्वित्वे धित्ववत् कृतद्वित्वयङ्लुगन्तेऽपि प्रकृतिप्रयुक्तकार्यसिद्धिरिति भावः । तथा च न्यायसिद्धेयमिति फलितम् ॥ ७६ ॥

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः ॥ ७७ ॥

स्पष्टम् । अत्र च ज्ञापकं 'बिल्वकादिभ्यश्छस्य लुक्' (६. ४. १५३) इति सूत्रे छग्रहणमित्येके, समुच्चयार्थकचशब्दयोगे विधेययोरैककालिकत्वैकदेशिकत्वनियमान्न्यायसिद्धेयमित्यन्ये ॥ ७७ ॥

संज्ञापूर्वको विधिरनित्यः ॥ ७८ ॥

अत्र च ज्ञापकम् 'ओरोदि'ति वक्तव्ये गुणग्रहणम् । इयं च विधेयकोटौ संज्ञापूर्वकत्व एव प्रवर्तते । तेन 'स्वं

Digitized by Google

रूपं—'(१. १. ६८), 'अणुदित्—' (१. १. ६९) इत्यादौ प्रवृत्त्यभाव इत्याहुः ॥ ७८ ॥

ताच्छीलिकेऽप्यणकृतं भवति ॥ ७९ ॥

ताच्छील्याद्यर्थे विहितप्रत्ययेष्वणकार्यं भवतीत्यर्थः । 'अन्' (६. ४. १६७) इति अणि विहितप्रकृतिभावबाधनार्थेन 'कार्मस्ताच्छील्ये' (६. ४. १७२) इति निपातेनैषा ज्ञाप्यत इत्यन्यत्र विस्तरः ॥ ७९ ॥

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥ ८० ॥

धातुस्वरूपोपादाने धातुशब्दव्यापारेण विहितप्रत्यये कार्यविज्ञानमित्यर्थः । अत्र च ज्ञापकं भ्रौणहत्ये तत्वनिपातनम् । अन्यथा 'हनस्तः—' (७. ३. ३२) इत्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत्र स्वरूपग्रहणं यथाकथञ्चिद्, न तु शृङ्गग्राहिकयोपादानमिति 'मृजेर्वृद्धिः' (७. २. ११४) इति सूत्रे भाष्ये स्पष्टम् । तेन परिमृड्भ्यामित्यादौ 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्'(६.१.५९) इत्यमागमो न। इयं च पदान्तनिमित्तकार्ये न, अप्रशानिति निषेधाल्लिङ्गात् । 'न भूसुधियोः' (६. ४. ८५) इति निषेधेनानित्यत्वज्ञापनादियङ्(पि?दि)विधावपि नेति ज्ञेयम् ॥ ८० ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ८१ ॥

'येन विधिः—' (१. १. ७२) इति सूत्रे भाष्ये स्पष्टम् ॥ ८१ ॥

Digitized by Google

तदेकदेशस्तद्ग्रहणेन गृह्यते ॥ ८२ ॥

इति तत्रैव भाष्ये स्पष्टम् ॥ ८२ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् ॥ ८३ ॥

अत्र च ज्ञापकं 'स्वरतिसूति—'(७. २. ४४) इति सूत्रे सूतिसूयत्योः पृथङ्निर्देशः । अन्यथा सूङ इत्येव वदेत् । इयं च 'गातिस्था—' (२. ४. ७७) इति सूत्रे भाष्ये स्पष्टा ॥ ८३ ॥

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ८४ ॥

अनूद्यमानविशेषणेषु नोपतिष्ठते, किन्तु विधावेवेत्यर्थः । इयं च साक्षाद् विध्यङ्गभूतानां साक्षाद्विधेयेनासिद्धत्वादन्वयासम्भवे तद्विशेषणव्यवस्थापकत्वेन चरितार्थानां तद्विशेषणव्यवस्थापकत्वे मानाभाव इति तर्कमूलेयमित्येके । 'उदीचामातः स्थाने—' (७. ३. ४६) इति स्थानेग्रहणमस्या ज्ञापकमित्यन्ये ॥ ८४ ॥

प्रकृतिग्रहणे ण्यधिकस्य ग्रहणम् ॥ ८५ ॥

केवलधातुग्रहणे णिजन्तस्यापि ग्रहणमित्यर्थः । 'हेरचङि' (७. ३. ५६) इति सूत्रेऽचङीति प्रतिषेधेनास्या ज्ञापनात् कुत्वमात्रविषयेयमिति भाष्ये स्पष्टम् ॥ ८५ ॥

अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ८६ ॥

अङ्गे अङ्गाधिकारे वृत्तं वर्तनं यस्य तदङ्गवृत्तं शास्त्रम् । तस्मिन् कृते सति पुनः शास्त्रान्तरं न प्रवर्त्तत इत्य(र्थेन ? र्थः । तेन) यूयं वयमित्यत्र शेषे लोपोऽन्तलोप इति पक्षे जसः शीभावो न । एषा च परिभाषा

Digitized by Google

'ज्यादादीयसः' (६. ४. १६०) इति सूत्रे भाष्ये ज्ञापिता। अन्यथा ज्यायानित्यत्रेयसुन ईकारस्य 'बहोर्लोपः—' (६. ४. १५८) इत्यतो लोपमनुवर्त्य लोपं विधाय 'अकृत्सार्वधातुकयोः—'(७. ४. २५) इति दीर्घेण च सिद्धे किमाद्विधानेनेति। अनित्या चेयं, द्वयोरित्यादिनिर्देशात्। अनित्यत्वबललभ्यार्थाभिप्रायेण वा 'भ्यसो भ्यम्' (७. १. ३०) इति सूत्रे निष्ठितस्येति पठितम्॥ ८६ ॥

आगमशास्त्रमनित्यम् ॥ ८७॥

'नि लोडि'त्येव सिद्धे आनिग्रहणमत्र लिङ्गम्। तेन 'सागरं तर्तुकामस्ये'त्यादि सिद्धम् ॥ ८७ ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः ॥ ८८॥

कृत्रिमं स्वशास्त्रसङ्केतितम्। अनित्या चेयम्। 'सङ्ख्याया अतिशदन्तायाः कन्' (५. १. २२) इति सूत्रे शदन्तपर्युदासात्। स्पष्टं चैतत् सङ्ख्यासंज्ञासूत्रे भाष्ये ॥ ८८ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः ॥८९॥

अन्तरङ्गोपजीव्यापेक्षयापि प्रधानप्राबल्यस्य लोके दृष्टत्वान्न्यायमूलिका चेयम्। 'हेतुमति—' (३. १. २६) इति सूत्रे भाष्यकैयटयोः स्पष्टमेतत् ॥ ८९ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥९०॥

उक्तन्यायमूलिकेयम्। तेन नमस्करोति देवानिति सिद्धम् ॥ ९० ॥

Digitized by Google

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ ९१ ॥

योगजन्यबोधे रूढिजन्योपस्थितिः प्रतिबन्धिकेति रथकाराधिकरणन्यायसिद्धेयम् ॥ ९१ ॥

गणकार्यमनित्यम् ॥ ९२ ॥

'तनादिकृञ्भ्यः—' (३. १. ७९) इति सूत्रे कृञ्ग्रहणमत्र लिङ्गम् । तेन 'न विश्वसेदि'त्यादि सिद्धम् ॥ ९२ ॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ ९३ ॥

'व्याख्यानत—' इत्यस्य प्रपञ्चोऽयम् । 'लटः शतृ—' (३. २. १२४) इत्यादौ भाष्ये स्पष्टम् ॥ ९३ ॥

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ९४ ॥

अन्त्यसदेशासदेशयोरेकप्रयोगे युगपत् प्राप्तावन्त्यस(दे)देशस्येत्यर्थः । अदसुयङ् । 'ष्यङः सम्प्रसारणम् —'(६. १. १३) इति सूत्रे भाष्येऽस्याः परिभाषायाः प्रयोजनेऽन्यथासिद्धिप्रदर्शनेनेयं प्रत्याख्याता ॥ ९४ ॥

नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ ९५ ॥

अभ्यासविकारं वर्जयित्वानर्थकेऽलोन्त्यविधिर्नेत्यर्थः । अस्या ज्ञापकम् 'इदोऽय् पुंसि' (७. २. १११) इति सूत्रस्थमिद्ग्रहणम् । अन्यथा 'इदमो मः' (७. २. १०८) 'दश्च' (७. २. १०९) 'यः सौ' (७. २. ११०) 'अय् पुंसि' इत्येव वदेत् । अनभ्यासविकार इति तु 'अर्तिपिपर्त्योश्च' (७. ४. ७७) इति निर्देशेन ज्ञाप्यते । इयं चोपधासंज्ञासूत्रे भाष्ये प्रत्याख्याता ॥ ९५ ॥

Digitized by Google

विधिनियमसम्भवे विधिरेव ज्यायान् ॥ ९६ ॥

मीमांसकानां परिसङ्ख्याविधेर्वैयाकरणैर्नियमविधित्वेन व्यवहारात् । परिसङ्ख्यायाश्च स्वार्थहानिः परार्थपरिकल्पना, प्राप्तबाधश्चेति दोषत्रयविशिष्टत्वाद् नियमविध्यपेक्षयात्यन्ताप्राप्तार्थप्रापकापूर्वविधिरेव युक्त इति भावः ॥ ९६ ॥

सामान्यातिदेशे विशेषानतिदेशः ॥ ९७ ॥

सामान्योपस्थितिकाले नियमेन विशेषोपस्थापकसामग्र्यभावाद् न्यायमूलिकेयम् । तेन 'आशंसायां भूतवच्च' (३. ३. १३२) इति लुङ एवातिदेशो न लङ्लिटोः । 'न ल्यपि' (६. ४. ६९) इति लिङ्गादानित्येयमित्याहुः ॥ ९७ ॥

प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ९८ ॥

इयं चाङ्गसूत्रे भाष्ये पठिता । तत्रैव कैयटे वर्णग्रहणे न प्रवर्तत इत्यपि स्थितम् ॥ ९८ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ९९ ॥

सहचरणसम्बन्धज्ञानमूलकतदर्थमात्रतात्पर्यग्रहोऽस्या बीजम् । यथा रामलक्ष्मणावित्युक्ते दाशरथेरेव बोधः ॥ ९९ ॥

श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् ॥ १०० ॥

अत्र श्रुतत्वं साक्षाच्छ्रूयमाणत्वम् । अनुमितत्वं सामान्यरूपेण प्रतीतिविषयत्वम् । तेन विशेषविषयानु-

Digitized by Google

मानात् । (तथाच?) यद्वा, अनुमितत्वं प्रकरणप्राप्तत्वम् । तथाच विलम्बितोपस्थितिकत्वापेक्षया शीघ्रोपस्थितिकत्वस्य लघुत्वादिति भावः । तेन 'अस्थिदधि—' (७. १. ७५) इत्यादौ लिङ्गं श्रूयमाणास्थ्यादीनामेव विशेषणं, न त्वङ्गस्येत्यतिदिश्य ब्राह्मणेनेति सिद्धम् । अनित्या चेयं 'तस्मादित्युत्तरस्य' (१. १. ६७) इति लिङ्गादित्याहुः ॥ १०० ॥

श्रुतानुमितयोः श्रुतेनैव सम्बन्धः ॥ १०१ ॥

इयमपि पूर्वस्यैव प्रपञ्चभूता ॥ १०१ ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ १०२ ॥

लाक्षणिकत्वं विलम्बितोपस्थितिकत्वम् । तदपेक्षया शीघ्रोपस्थितिकत्वमेव युक्तमिति लौकिकन्यायमूलिकेयमिति स्पष्टं कैय्यटादिषु । एतच्च 'ओत्' (१. १. १५) इति सूत्रे भाष्ये स्पष्टम् ॥ १०२ ॥

गामादाग्रहणेष्वविशेषः ॥ १०३ ॥

एषु लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इत्यर्थः । अत्र च ज्ञापकं दैपः पित्त्वम् । तद्धि अदाबिति सामान्यग्रहणार्थम् । लाक्षणिकत्वादेवाग्रहणे सिद्धे किं निषेधसामान्यग्रहणार्थेन पित्त्वेन । इयं च लक्षणप्रतिपदोक्तपरिभाषाया निरनुबन्धकपरिभाषाया लुग्विकरणपरिभाषायाश्च बाधिका, येन नाप्राप्तन्यायात् । साहचर्यपरि-

Digitized by Google

भाषाया अर्थवत्परिभाषायाश्च बाधिकेयमित्येके । नेत्यन्ये । 'दाधा घु—' (१. १. २०) इति सूत्रे भाष्ये स्पष्टा ॥ १०३ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ १०४ ॥

यथा 'वृद्धिरादैच्' (१. १. १) इत्यत्र । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यादौ भुजिवत् ॥ १०४ ॥

क्वचित् सेमुदायेऽपि ॥ १०५ ॥

यत्रान्वर्थतादिकं गमकं, तत्रेति भावः । यथा संयोगसंज्ञायां द्वयोर्बहूनां वा संयोगसंज्ञा । यथा वा गर्गाः शतं दण्ड्यन्तामित्यत्र अर्थिनश्च राजानो हिरण्येन भवन्तीति वाक्यशेषात् समुदाये वाक्यपरिसमाप्तिः ॥ १०५ ॥

उभयथापि वाक्यपरिसमाप्तिः ॥ १०६ ॥

यथा 'अट्कुप्वाङ्—' (८. ४. २) इत्यत्र, यथा वा गर्गैः सह न भोक्तव्यमित्युक्ते समुदितैः प्रत्येकं च न भुज्यते, तद्वत् । त्रितयं चैतन्न्यायसिद्धं, व्याख्यानगम्यं चेति ध्येयम् ॥ १०६ ॥

अभेदका गुणाः ॥ १०७ ॥

उदात्तादयो गुणा भेदकरा न भवन्तीत्यर्थः । मुण्डित्वजटिलत्वादिभिर्देवदत्तस्यान्यत्वाभावाद् न्यायसिद्धेयम् । 'अनडुदात्त' इत्युदात्तग्रहणमपि ज्ञापकम् । अन्यथा अनङ् उदात्तगुण एवोच्चार्येत । एतच्च वृद्धिसूत्रे

Digitized by Google

भाष्ये स्पष्टम्। 'अणुदित्—'(१. १. ६९) सूत्रेऽण्ग्रहणाद-नित्येयमिति ध्येयम् ॥ १०७ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ १०८ ॥

'येन विधिः—' (१. १. ७२) इत्यस्यायं प्रपञ्च इत्यवोचाम । इयं चोत्तरपदाधिकारेऽपि प्रवर्तते । परं तूत्तरपदशब्दं विशेष्यं कृत्वा तद्विशेषणे तु न प्रवर्तते। 'हृदयस्य हृल्लेख—' (६. ३. ५०) इति लेखग्रहणाल्लिङ्गात् ॥ १०८ ॥

बाधकान्येव निपातनानि ॥ १०९ ॥

शास्त्रेण प्राप्तकार्यस्य बाधकं निपातनमित्यर्थः । तेन सर्वनामानीत्यत्र 'पूर्वपदात् संज्ञायाम्—' (८. ४. ३) इति णत्वाभावः । एतच्च 'सर्वादीनि—' (१. १. २७) इति सूत्रे भाष्ये स्पष्टम् । तक्रकौण्डिन्यन्यायमूलकमेतत्॥ १०९॥

अबाधकान्यपि निपातनानि ॥ ११० ॥

'तयोरेव कृत्य—' (३. ४. ७०) इति सूत्रे एवकारेण तक्रकौण्डिन्यन्यायस्यानित्यत्वज्ञापनात् तन्मूलिकेयम् । एतच्च वृत्त्यादिषु स्पष्टम् ॥ ११० ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १११ ॥

'कृतकारि खल्विदं शास्त्रं मेघवदि'ति 'इको झल्' (१. २. ९) इति सूत्रस्थभाष्येण न्यायसिद्धेयम्। तेन ऊख-

Digitized by Google

तुरित्यादौ ह्रस्वस्याप्यभ्यासह्रस्वत्वे ततो दीर्घे पुनर्ह्रस्वो न भवति, 'लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरि'ति न्यायात् ॥ १११ ॥

लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः ॥ ११२ ॥

यथोक्तविषयेषु ह्रस्वाप्रवृत्तिः । 'इरयो रे' (६. ४. ७६) इति द्विवचननिर्देशोऽस्या ज्ञापक इति स्पष्टम् 'एकः पूर्वपरयोः (६. १. ८४) इति सूत्रे भाष्ये ॥ ११२ ॥

निषधाश्च बलीयांसो भवन्ति ॥ ११३ ॥

तसिलादिषु जातीयदेशीययोर्ग्रहणं चास्या लिङ्गम् । अन्यथा 'पुंवत्कर्मधारय —' (६. ३. ४२) इति सिद्धे तद्वैयर्थ्यं स्पष्टमेव । एतच्च 'न लुमताङ्गस्य' (१. १. ६३)'कर्मेर्णिङ्' (३. १.३०)इत्यादौ भाष्ये स्पष्टम् ॥ ११३ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ ११४ ॥

अर्थाकाङ्क्षायामन्यानुपस्थितिरस्या बीजम् । स्पष्टं च 'सुपिस्थः' (३. २. ४) इत्यत्र भाष्ये ॥ ११४ ॥

योगविभागादिष्टसिद्धिः ॥ ११५ ॥

न त्वनिष्टापादनं कार्यमित्यर्थः । तत्तत्समानविधिकद्वितीययोगेन विभक्तस्य *ज्ञापनाद्येतद्बीजम् ॥ ११५ ॥

पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते ॥ ११६ ॥

---

* 'अनित्यत्वज्ञापनमेतद्बीजमि'ति परिभाषेन्दुशेखरः ।

Digitized by Google

तत्र तत्र 'अन्यतरस्यां' 'विभाषा' 'वा' इति सूत्रनिर्देशादिदं सिद्धम् ॥ ११६॥

यथोद्देशं संज्ञापरिभाषम् ॥ ११७ ॥

संज्ञाशास्त्रं परिभाषाशास्त्रं च यत्रोपदिष्टं, तत्रैवेत्यर्थः । इदं यथाश्रुतग्राहिप्रतिपत्रपेक्षया । धृतराज्ञामित्यादिनिर्देशाश्चास्या लिङ्गम् ॥ ११७॥

कार्यकालं संज्ञापरिभाषम् ॥ ११८ ॥

यत्र कार्यं तत्रोभयोरुपस्थितिरित्यर्थः । अत्र च 'वृद्धिरादैच्' (१. १. १) इत्यत्र त्रैपादिकस्य रोरुकारस्येत्संज्ञाप्रयुक्तलोपकरणं ज्ञापकम् । इत्त्वे हि लोपस्तत्सामर्थ्यादेव सिद्धः । युक्तिसिद्धा चेयम् ॥ ११८॥

ज्ञापकसिद्धं न सर्वत्र ॥ ११९ ॥

तत्र तत्र परिभाषाणामनित्यत्वज्ञापनमूलमेतत् ॥ ११९ ॥

उभयत आश्रयणे नान्तादिवत् ॥ १२० ॥

इयम् 'अन्तादिवच्च' (६. १. ८५) इति सूत्रे भाष्ये स्पष्टा । नह्युभयोस्तुल्ययोरेकः प्रेष्यो विरुद्धकार्यकृद् भवति, किन्तु द्वयोरपि कार्यकृन्न भवतीति न्यायसिद्धेयमित्यपि तत्रैव । तेन अभीयादित्यादिसिद्धिः ॥ १२० ॥

समासप्रत्ययविधौ प्रतिषेधः ॥ १२१ ॥

Digitized by Google

तदन्तविध्यपवादः । तेन कृष्णं परमश्रितः, सूत्रनड इत्यादौ समासप्रत्ययाभावः ॥ १२१ ॥

उगिद्वर्णग्रहणवर्जम् ॥ १२२ ॥

पूर्वोक्तस्यापवादः । उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वेत्यर्थः । तेनातिमहतीत्यादिसिद्धिः । एतदुभयमपि 'येन विधिः—' (१. १. ७२) इति सूत्रे वार्त्तिकत्वेन भाष्ये पठितम् । 'दित्यदिति—' (४. १. ८५) इति सूत्रेऽदितिग्रहणमाद्यस्य ज्ञापकमित्याहुः ॥ १२२ ॥

वर्णाश्रये नान्तादिवत् ॥ १२३ ॥

इयमपि 'अन्तादिवच्च' (६. १. ८५) इति सूत्रे भाष्ये वार्त्तिकत्वेन पठिता ॥ १२३ ॥

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः ॥ १२४ ॥

न त्वादिष्टादच इत्यर्थः । 'अचः परस्मिन्—' (१. १. ५७) इति सूत्रवार्त्तिकसिद्धार्थकथनमेतत् । 'ह्वावामश्च' (३. २. २) इति सूत्रे भाष्ये स्पष्टम् ॥ १२४ ॥

एकदेशविकृतमनन्यवद् भवति ॥ १२५ ॥

स्थानिवत्सूत्रे वार्त्तिकत्वेन भाष्ये पठिता । स्थानिवत्सूत्रादेशग्रहणसिद्धार्थकथनमेतत् ॥ १२५ ॥

पूर्वत्रासिद्धीयमद्विर्वे ॥ १२६ ॥

Digitized by Google

'सर्वस्य द्वे' (८. १. १) इति सूत्रे वार्त्तिकत्वेन पठितम् । 'न मु ने' (८. २. ३) इत्यत्र योगविभागसिद्धं च। इदं च द्वित्वाश्रयवर्णस्यान्यस्य वासिद्धत्वे कार्ये सर्वत्र प्रवर्तते । अप्रवृत्तौ मानाभावात् । इयं च 'उभौ साभ्यासस्य—(८. ४. २१) इति लिङ्गादनित्या ॥ १२६ ॥

णौ कृतं द्वित्वे न स्थानिवत् ॥ १२७ ॥

इदं च 'द्विर्वचनेऽचि' (१. १. ५९) इति सूत्रे भाष्ये वार्त्तिकत्वेन पठितम् । 'ओः पुयण्जि—' (७. ४. ८०) इति सूत्रे पययोरिति वक्तव्ये वर्गप्रत्याहारजग्रहोऽस्या लिङ्गमिति 'ऊन परिहाण' इति धातौ सिद्धान्तकौमुदीमनोरमयोः, 'द्विर्वचनेऽचि' (१.१.५९) इति सूत्रे कौस्तुभे च विस्तरेण प्रपञ्चितम् ॥ १२७ ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ १२८ ॥

'न पदान्त—' (१. १. ५८) इति सूत्रे वार्त्तिकमिदं त्रिपाद्यसिद्धत्वन्यायमूलकम् ॥ १२८ ॥

सन्देहे बहुवचनं प्रयोक्तव्यम् ॥ १२९ ॥

सन्देहजन्यप्रश्नादावित्यर्थः। तेन कतीत्यस्य नित्यबहुवचनान्तत्वमेव । द्वयोरेकस्मिन् वा सन्देहस्यैवासत्त्वेन न्यायसिद्धमेतत् । सन्देहविषयस्य च बहुत्वात् ॥ १२९ ॥

पित्स्वराच्चित्स्वरो बलीयान् ॥ १३० ॥

Digitized by Google

परत्वान्न्यायसिद्धमेतत् । 'यङश्चाप्' (४.१.७४) इति सूत्रे भाष्ये स्पष्टमेतत् ॥ १३० ॥

विधिविधानविधिभाजां त्रयाणां समवधाने तदन्तविधिः (१८) ॥

व्याख्यातम् ॥

अथ प्रक्षिप्ता निर्मूलाश्च प्रदर्श्यन्ते—

उदित् सवर्णं गृह्णाति ॥ १ ॥

न सवर्णमात्रं, स्थानमात्रतुल्यं सवर्णं गृह्णातीत्यर्थः । विशिष्टस्यैव सवर्णसंज्ञाविधानाद् भाष्येऽदर्शनाच्चेयं प्रक्षिप्ता ॥ १ ॥

क्वचिद् विकृतिरपि प्रकृतिं गृह्णाति ॥ २ ॥

इयं निर्मूला भाष्याव्यवहृता च । 'निसमुपविभ्यः —' (१. ३. ३०) इत्यादौ ह्येञ एवानुकरणे लक्षणवशसम्पन्नमात्वम् । अशितीति प्रसज्यप्रतिषेधः ॥ २ ॥

सम्प्रसारणं तदाश्रयकार्यं च बलवत् ॥ ३ ॥

निर्मूलेयं 'लिट्यभ्यासस्य—' (६. १.१७) इत्युभयेषांग्रहणवैयर्थ्यापातेन भाष्ये प्रत्याख्याता ॥ ३ ॥

क्रियाविशेषणानां कर्मत्वमेकत्वं क्लीबत्वं च ॥ ४ ॥

इयं भाष्यापठिता । 'ज्योतिष्टोमेन यजेते'त्यादौ करणत्वदर्शनात् फलविशेषणे कर्मत्वस्य पूर्वेणैव सिद्धे-

Digitized by Google

श्च सामान्येन नपुंसकत्वस्यापि सिद्धेश्च क्रियाविशेषण-(त्वा)देव न्यायत एकत्वस्य सिद्धेश्च व्यर्था ॥ ४ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ ५ ॥

इयं निर्मूला । तत्र तत्रोपदेशग्रहणं कुर्वतः सूत्र-कृतोऽसम्मता च 'दादेर्धातोर्घः'(८. २. ३२)इति सूत्रेऽधो-गित्यादौ घत्वाप्राप्तिसमाधानपरभाष्यासम्मता च ॥ ५ ॥

सर्वविधिभ्य इड्विधिर्बलीयान् ॥ ६ ॥

इयं भाष्याव्यवहृता निर्मूला च ॥ ६ ॥

सर्वविधिभ्यो लोपविधिर्बलीयान् ॥ ७ ॥

इयं भाष्याव्यवहृता निर्मूला च । आशीरित्यादौ क्किबादेरन्तरङ्गत्वाल्लोप इत्वार्थं 'प्रत्ययलोपे—'(१.१.६२) इत्यस्य चारितार्थ्यान्निष्फला च ॥ ७ ॥

प्रतिपदविधानाद् योगविभागो गरीयान् ॥ ८ ॥

इयं निर्मूला तत्र तत्र योगविभागमाश्रित्य सूत्र-प्रत्याख्यानपरभाष्यविरुद्धा च ॥ ८ ॥

गर्भवदाबादयो भवन्ति ॥ ९ ॥

प्रातिपदिकस्वाद्योर्मध्य इत्यर्थः । 'न यासयोः' (७. ३. ४५) इति ज्ञापकसिद्धा । सन्निपातपरिभाषानि-त्यत्वमूलेयम् ॥ ९ ॥

वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ १० ॥

Digitized by Google

यथा 'शदेः शितः' (१. ३. ६०) इति। न्यायसिद्धा चेयम् ॥ १० ॥

परिभाव्य महाभाष्यं दिङ्मात्रमिह दर्शितम् ।
तेन तुष्यन्तु विबुधा मत्कृतिं वीक्ष्य सादरम् ॥

इति श्रीपदवाक्यप्रमाणपारावारीणस्य रामचन्द्राध्वरेः पौत्रेण
वरदेश्वरदीक्षितपुत्रेण नीलकण्ठदीक्षितेन
विरचिता परिभाषावृत्तिः

समाप्ता ॥

शुभं भूयात् ।

Digitized by Google

परिभाषासूची ।

	पृष्ठम्.		पृष्ठम्.
अकृतव्यूहाः	२९	उभयथापि वाक्य	४२
अङ्गवृत्ते पुन	३७	उभयनिर्देशे	१७
अनन्तरस्य वि	२३	एकदेशविकृत	४६
अनन्त्यविकारे	३९	एकयोगनिर्दि	१०
अनिनस्मन्ग्रह	८	औपदेशिक	४९
अनिर्दिष्टार्थाः	४४	कार्यकालं संज्ञा	४५
अन्तरङ्गबहिरङ्ग	१३	कृतमपि निव	३१
अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्	३०	कृत्रिमाकृत्रिम	३८
अन्तर.....ङ्गो ल्यब्	,,	कृद्ग्रहणे गति	१६
अबाधकान्यपि	४३	क्त्यल्युट्तुमुन्खल	२५
अभेदका गुणाः	४२	क्रियाविशेषणानां	४८
अभ्यासविकारेषु	२४	क्वचित् समुदाये	४२
अर्थवद्ग्रहणे	६	क्वचिदपवाद	२०
अलैवानर्थकेन	७	क्वचिदेकदेशो	६
अवयवप्रसिद्धेः	३९	क्वचिद् विकृति	४८
असति सम्भवे	२०	गणकार्यमनि	३९
असिद्धं बहिरङ्ग	२७	गतिकारकोप	१९
अस्ति च सम्भवो	२१	गर्भवदाद्यादयो	४९
आगमशास्त्रम	३८	गामादाग्रहणे	४१
इतरेतराश्रया	२	गौणमुख्ययो	७
उगिद्वर्णग्रहण	४६	ग्रहणवता प्रा	३३
उणादयोऽव्यु	१०	चानुकृष्टं नोत्त	२६
उणादयो व्यु	११	ज्ञापकसिद्धं न	४५
उदित् सवर्ण	४८	णौ कृतं द्वित्वे न	४७
उपजनिष्यमाण	३१	तदनुबन्धक	३२
उपपदविभक्तेः	३८	तदेकदेशस्त	३७
उभयत आश्र	४५	तन्मध्यपतित	३६

Digitized by Google

	पृष्ठम्.		पृष्ठम्.
ताच्छीलिकेऽप्य	३६	प्रधानाप्रधान	३८
ताच्छीलिकेषु वा	२४	प्रातिपदिकम्र	१७
धातोः स्वरूप	३६	बाधकान्येव नि	४३
नञिवयुक्तमन्य	१८	भवति (हि) बहु	२६
न वर्णग्रहणेषु	७	भाव्यमानोऽण्	८
न हि कार्यी निमि	१	मध्येऽपवादाः	२२
नाजानन्तर्ये	२८	यथोद्देशं संज्ञा	४५
नानर्थकेऽलोन्त्य	३९	यदागमास्त	२
नानुबन्धकृतमनेक	४	यस्मिन्विधिस्तदा	९
नानुबन्धकृतमनेज	,,	येन नाप्राप्ते	२१
नानुबन्धकृतमसा	५	योगविभागादि	४४
निमित्तापाये	३१	यो ह्यनादिष्टादचः	४६
निरनुबन्धक	३२	लक्षणप्रतिपदो	४१
निर्दिश्यमान	३	लक्ष्ये लक्षणस्य	४४
निषेधाश्च बली	४४	लिङ्गवचनम	१८,
पदाङ्गाधिकारे	१७, ४३	लुग्विकरणालु	३७
परिहृत्यापवाद	२०	वर्णाश्रये नान्ता	४६
पर्जन्यवल्लक्षण	४३	वर्णाश्रये नास्ति	५
पर्यायशब्दानां	४४	वर्त्स्यत्प्रवृत्त्येह	४९
पित्स्वराच्चित्स्वरो	४७	वार्णादाङ्गं बली	२९
पुनः प्रसङ्ग	१३	विकरणेभ्यो नि	१२
पुरस्तादपवादा	२२	विधिनियम	४०
पूर्वं धातुरुप	१४	विधिविधान	९
पूर्वं धातुः साध	,,	विधौ परिभा	३७
पूर्वत्रासिद्धीयम	४६	विभक्तौ लिङ्ग	१८
पूर्वत्रासिद्धीये	४७	व्यपदेशिवद्भा	३३
प्रकृतिग्रहणे व्य	३७	व्यवस्थितविभा	३९
प्रकृतिग्रहणे य	३५	व्याख्यानतो वि	१
प्रकृतिवदनु	११	श्रुतानुमितयोः श्रुत	४०
प्रतिपदविधा	४९	श्रुतानुमितयोः श्रुते	४१
प्रत्ययग्रहणे चा	१५	संज्ञापूर्वको वि	३५
प्रत्ययग्रहणे य	१४	संज्ञाविधौ प्रत्य	१६
प्रत्ययाप्रत्ययोः	४०	सकृद्गतौ विप्र	१२
प्रत्येकं वाक्य	४१	सत्यपि सम्भवे	२१

Digitized by Google

	पृष्ठम्.		पृष्ठम्.
सन्देहे बहुव	४७	सर्वो द्वन्द्वो विभा	११
सन्निपातलक्ष	३४	सहचरितासह	४०
सन्नियोगशिष्टा	३५	सामान्यातिदेशे	,,
समासप्रत्यय	४५	साम्प्रतिकाभावे	२५
समासान्तविधि	३४	स्त्रीप्रत्यये चानु	१५
सम्प्रसारणं तदा	४८	स्वरविधौ व्यञ्ज	३२
सर्वविधिभ्य इ	४९	स्वार्थिकाः प्रत्य	३३
सर्वविधिभ्यो लो	,,	हल्स्वरप्राप्तौ	३२
सर्वे विधयश्छ	१४		

Digitized by Google

Digitized by Google

Ready for sale.

	Rs.	As.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa.	0	4	0
No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita.	2	0	0
No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary.	2	12	0
No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva.	2	0	0
No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî.	2	4	0
No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha.	0	8	0
No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Adîsesha with the commentary of Râghavânanda.	0	8	0
No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2		0
No. 14 — नीतिसारः (Nîti) by Kâmandaka. with the commentary of Sankarârya.	3	0	0
No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1		0

Digitized by Google

No. 16—प्रतिज्ञायौगन्धरायणम् (Do.) Do. 1 8 0
No. 17—पञ्चरात्रम् (Do.) Do. 1 0 0
No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya. 4 0 0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita. 1 4 0
No. 20—अविमारकम् (Nâtaka) by Bhâsa. 1 8 0
No. 21—बालचरितम् (Do.) Do. 1 0 0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa 1 8 0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas) 1 12 0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. 1 0 0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri 0 12 0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa 0 12 0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Aruṇagirinâtha and Vivaraṇa of Nârâyaṇa Pandita (1 & 2 Sargas) 1 12 0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas 0 8 0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (3rd Kânda) 2 4 0
No. 30—वास्तुविद्या (Silpa) 0 12 0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (4th, 5th, & 6th Kâṇḍas) 1 0 0
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Aruṇagirinâtha and Vivaraṇa of Nârâyaṇa Paṇḍita (3rd, 4th & 5th Sargas) 2 8 0
No. 33—वाररुचसंग्रहः (Vyâkaraṇa) with the commentary Dîpaprabhâ of Nârâyana 0 8 0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin 1 4 0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha 1 8 0

Digitized by Google

No. 36—कुमारसम्भवः (Kâvya)by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivaraṇa of Nârâyaṇa Pandita(6th,7th & 8th sargas) 3 0 0

No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary 0 4 0

No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Sarvânanda (1st Kânda) 2 0 0

No. 39—चारुदत्तम् (Nâtaka) by Bhâsa 0 12 0

No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Srî Mankhuka and its commentary by Samudrabandha 2 8 0

No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivaraṇa of Srî Sankara Bhagavat Pada 0 4 0

No. 42—प्रतिमानाटकम् (Nataka) by Bhâsa 1 8 0

No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and Tikasarvaswa of Vandyaghatiya-Sarvananda (Par II. 2nd Kanda 1—6 Vargas) 2 8 0

No. 44.—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama 0 4 0

No. 45.—प्रपञ्चहृदयम् (Prapanchahridaya) 1 0 0

No. 46.—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita 0 0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google